Entered
7. 7. 18
CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

BIBLIOTHECA INDICA:

A

COLLECTION OF ORIENTAL WORKS

PUBLISHED BY THE

ASIATIC SOCIETY OF BENGAL.

NEW SERIES, No. 1338.

PROVINCIAL MUSEUM LUCKNOW REFERENCE LIBRARY

तत्त्वचिन्तामणि-दीधिति-विवृतिः



5149

TATTVACINTĀMANI DIDHITI-VIVRITI

BY

GADADHARA BHATTACHARYYA

WITH TATTVACINTAMANI AND DIDHITI

EDITED BY

MAHĀMAHOPĀDHYĀYA KAMAKHYANATHA TARKAVAGISA,

Late Professor, Sanskrit College.

VOLUME I. FASCICULUS VII.

Calcutta,

PRINTED BY UPENDRA NATHA CHAKRAVARTI, AT THE SANSKRIT PRESS
5, Nandakumar Chawdhury's 2nd Lane.

AND PUBLISHED BY THE
ASIATIC SOCIETY OF BENGAL, 1, PARK STREET.

1912.

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

LIST OF BOOKS FOR SALE

AT THE LIBRARY OF THE

ASIATIC SOCIETY OF BENGAL.

No. 1, PARK STREET, CACUTTA,

AND OBTAINABLE FROM

THE SOCIETY'S AGENTS, MR. BERNARD QUARITCH, 11, GRAFTON STREET, NEW BOND STREET, LONDON, W., AND MR. OTTO HARRASSOWITZ, BOOKSELLER, LEIPZIG, GERMANY.

*Complete copies of those works marked with an asterisk * cannot be supplied.—som of the Fasciculi being out of stock.*

BIBLIOTHECA INDICA.

Sanskrit Series

	Rs.	
Advaitachintā Kaustubha, Fasc. 1-3 @ /10/ each	1	14
Aitarēya Brāhmaṇa, Vol. I, Fasc. 1-5; Vol. II, Fasc. 1-5; Vol. III, Fasc. 1-5, Vol. IV, Fasc. 1-8 @ /10/ each	14	6
Aitereya Lochana.	2	0
Amarkosha, Fasc. 1	2	0
*Aṇu Bhāṣhya, Fasc. 2-5 @ /10/ each	2	8
Anumana Didhiti Prasarini, Fasc. 1 @ /10/-	1	4
Aṣṭasāhasrikā Prajñāpāramitā, Fasc. 1-6 @ /10/ each	3	12
Atmatattaviveka, Fasc. I.	0	10
Açvavaidyaka, Fasc. 1-5 @ /10/ each	3	2
Avadāna Kalpalatā, (Sans. and Tibetan) Vol. I, Fasc. 1-10; Vol. II. Fasc. 1-10 @ 1/ each	20	0
Bālam Bhaṭṭī, Vol. I, Fasc 1-2, Vol II, Fasc. 1 @ /10/ each	1	14
Baudhāyana S'rauta Sūtra, Fasc. 1-3 Vol. II, Fasc 1-5 @ /10/ each ...	5	0
Bhāsavritty	0	10
Bhaṭṭa Dipikā Vol. I, Fasc. 1-6; Vol. 2, Fasc. 1, @ /10 each ...	4	6
Bauddhastotrasangraha	2	0
Bṛhaddēvatā Fasc. 1-4 @ /10/ each	2	8
Bṛhaddharma Purāṇa Fasc 1-6 @ /10/ each	3	12
Bodhicaryāvatāra of Çāntideva, Fasc. 1-6 @ /10/ each	3	12
Çri Cantinatha Charita, Fasc. 1-3	1	14
Çatadūṣaṇī, Fasc. 1-2 @ /10/ each	1	4
Catalogue of Sanskrit Books and MSS., Fasc. 1-4 @ 2/ each	8	0
Çatapatha Brāhmaṇa, Vol I, Fasc. 1-7, Vol II, Fasc. I-5, Vol. III, Fasc. 1-7 Vol. V, Fasc. 1-4 @ /10/ each	14	6
Ditto Vol. VI, Fasc. 1-3 @ 1/4/ each	3	2
Ditto Vol. VII, Fasc. 1-5 @ /10/	3	2
Ditto Vol. IX. Fasc. 1-2	1	4
Çatasāhasrikā Prajñāpāramitā Part, I. Fasc. 1-17 @ /10/ each	10	10
*Caturvarga Chintāmaṇi, Vol. II, Fasc. 1-25; Vol. III. Part I, Fasc. 1-18. Part II, Fasc. 1-10. Vol. IV. Fasc. 1-6 @ /10/ each ...	36	14
Ditto Vol. IV, Fasc. 7-8. @ 1/4/ each	2	8
Ditto Vol. IV, Fasc. 9-10 @ /10/	1	4
Çloekavartika, (English) Fasc. 1-7 @ 1/4/ each	8	12
*Çrauta Sūtra of Çānkhāyana, Vol. I, Fasc. 1-7; Vol. II, Fasc. 1-4; Vol. III, Fasc. 1-4; Vol 4. Fasc. 1 @ /10/ each	10	0
Çri Bhāshyam, Fasc 1-3 @ /10/ each	1	14
Dāna Kriyā Kaumudī, Fasc 1-2 @ /10/ each	1	4
Gadadhara Paddhati Kālasāra Vol. I, Fasc. 1-7 @ /10/ each	4	6
Ditto Ācharasārah Vol. II, Fasc. 1-4 @ /10/ each	3	2
Gobhiliya Grihya Sutra, Vol. I. @ /10/ each	3	2
Ditto Vol. II. Fasc. 1-2 @ 1/4/ each	2	8
Ditto (Appendix) Gobhila Parisista	2	0
Ditto Grihya Sangraha	0	10
Haralata	1	14
Karmapradiph, Fasc. I	1	4
Kāla Viveka, Fasc. 1-7 @ /10/ each	4	6
Kātantra, Fasc. 1-6 @ /12/ each	4	8
*Kūrma Purāṇa, Fasc. 3-9 @ /10/ each	5	10
Kiranavali, Fasc. 1-2 @ /10/ each	1	4
Madana Pārijāta, Fasc. 1-11 @ /10/ each	6	14
Mahā-bhāṣya-pradipōdyōta, Vol. I, Fasc. 1-9; Vol. II, Fasc. 1-12 Vol. III, Fasc. 1-10 @ /10/ each	19	6
Ditto Vol. IV, fasc. 1 @ 1/4	2	8
Manuṭikā Sangraha, Fasc. 1-3 @ /10/ each	1	14
Mārkaṇḍēya Purāṇa, (English) Fasc. 1-9 @ 1/- each	9	0
*Mimāṁsā Darçana, Fasc. 10-19 @ /10/ each	6	4
*Mugdhabodha Vyakarana, Fasc. 1-4 @ /10/ each	2	8

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

केवलसंसर्गाभावत्वलाभायैवात्यन्तपदमिति दर्शयति, 'संसर्गाभावेति, 'तस्य' अत्यन्तपदस्य, अन्योन्याभावप्रतियोगिन्यव्याप्तिं परिहर्त्तुमाह, 'विरहपदस्येति, 'तज्ज्ञानेति तदन्वितं अभावान्वितं यज्ज्ञानं तत्प्रतिबन्धकज्ञानविषयार्थकत्वात् इत्यर्थः, अभावान्वये उपलक्षणज्ञानप्रभृतीनामेव विरहपदार्थघटकत्वं बोध्यम्, तेन नाभावपदवैयर्थ्यम्। एवञ्च तदभावग्रहप्रतिबन्धकग्रहविषयत्वमेव तदभावप्रतियोगित्वमिति फलितं एतच्चान्योन्याभावप्रतियोगित्वसाधारणमेवेत्याह, 'प्रतिबध्नाति हीति, प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोगिप्रकारकनिश्चयस्याभावधीप्रतिबन्धकत्वादिति भावः। प्रतिबन्धकत्वं यदि कारणीभूताभावप्रतियोगित्वं तदा प्रतियोगित्वान्तरप्रवेशादनवस्था इत्यतस्तदन्यथा निर्व्वक्ति, 'प्रतिबन्धकत्वञ्चेति, 'अत्र' प्रतियोगितालक्षणे, अभाव-प्रतियोगिमत्ताज्ञानयोरपि भिन्नकालावच्छेदेन एकत्रात्मनि एकक्षणावच्छेदेन च विभिन्नात्मनिवर्त्तमानत्वात् 'एककालावच्छेदेन एकत्रेति, कालपदं क्षणपरं, तेन स्थूलकालावच्छेदेन तयोरेकाधिकरणवृत्तित्वेऽपि न क्षतिः। अत्र एकत्रेत्यनतिप्रयोजनकं, अभावज्ञानाधिकरणक्षणावच्छेदेन तच्छून्यात्मनिष्ठप्रतियोगिज्ञानस्यासंग्रहेऽपि तज्ज्ञानाधिकरणक्षणावृत्तियत्किञ्चित्प्रतियोगिज्ञानव्यक्तिमादाय लक्षणगमनसम्भवात्। न च कालमात्रस्यैव परमेश्वरीयाभावज्ञानाधिकरणतया अभावज्ञानाधिकरणक्षणावृत्तिज्ञानाप्रसिद्धिरिति वाच्यम्। अभावज्ञानावच्छेदकक्षणावच्छिन्नवृत्तिकान्यत्वरूपस्य एककालावच्छेदेनावर्त्तमानत्वस्य निवेशे नित्यस्य भगवज्ज्ञानस्य कालविशेषानवच्छिन्नतया सर्व्वत्र

State Museum Library Lucknow 5149

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रतियोगिज्ञाने तादृशवृत्तिकत्वानियमात्। घटाद्यभावज्ञानाद्यवच्छेदकक्षणानवच्छिन्नपटादिज्ञानव्यक्तिमादायातिप्रसङ्गस्तु एकक्षणावच्छेदेन घटाद्यभावज्ञानाधिकरणवृत्तिपटादिज्ञानस्यापि सत्त्वेनातिप्रसङ्गवदभावपदस्य स्वाभावपरतयैव वारणीय इत्यवधेयम्। न चैवं सति एकक्षणावच्छिन्नत्वं परित्यज्य एकाधिकरणावृत्तित्वनिवेशेनापि निर्व्वाहसम्भवः एकपुरुषीयघटाद्यभावज्ञानव्यधिकरणपुरुषान्तरीयघटादिज्ञानमादायैव घटादौ तदभावप्रतियोगित्वोपपत्तेरिति वाच्यम्। अभावज्ञानस्य हि घटाद्यभावज्ञानत्वेनैव निवेशान्न तत्तद्व्यक्तित्वादिना तथाच घटाद्यभावज्ञानव्यधिकरणघटादिज्ञानमेव दुर्लभं सर्व्वेषामेवात्मनां कदाचिद्घटाद्यभावज्ञानवत्त्वात् इत्येकक्षणावच्छिन्नत्वनिवेशस्यावश्यकत्वात्। न च तदधिकरणावृत्तित्वशरीरे प्रतियोगितायां तदधिकरणवृत्तित्वत्वावच्छिन्नत्वनिवेशनमफलं तदधिकरणवृत्तित्वप्रतियोगिताकाभावनिवेशेनाप्युपपत्तेः घटाभावज्ञानवदवृत्तिपटादिज्ञाने तद्वृत्तित्वप्रतियोगिकतद्विशेषाभावादिसत्त्वेऽपि स्वाभावस्य निवेशनीयतया अतिप्रसङ्गानवकाशात् तथाच घटादिज्ञाने घटाभावादिज्ञानाधिकरणवृत्तित्वसत्त्वेऽपि तत्प्रतियोगिकाभावसौलभ्यात् घटादेः स्वाभावप्रतियोगित्वमुपपद्यत एवेति वाच्यम्। तदधिकरणवृत्तित्वनिष्ठप्रतियोगितायाः प्रकारतया निवेशे प्रतियोगित्वज्ञानस्य प्रतियोगित्वान्तरज्ञानापेक्षया दुर्ज्ञेयतापत्त्या अभावे तादृशप्रतियोगितायाः सम्बन्धतया निवेश्यतया प्रतियोगितायाः यत्र प्रतियोगिसंसर्गतया प्रवेशस्तत्र प्रतियोगिप्रकारीभूतधर्म्मावच्छिन्न-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्वभानस्यावश्यकतया तदधिकरणवृत्तित्वत्वावच्छिन्नाभावस्यैव प्रतिबन्धकतारूपतया एकत्वावच्छिन्नत्वानिवेशे उक्तानुपपत्तेरनुद्धारादित्यवधेयम् (१)। अन्योन्याभावप्रतियोगितावच्छेदकातिप्रसक्तिं निराकर्त्तुमाह, 'अभावपदस्य चेति, 'स्वाभावपरत्वादिति, तथाच स्वीयोयोऽभावः स्वनिष्ठं तद्विरहत्वमेव स्वस्य तदभावप्रतियोगित्वं, घटान्योन्याभावश्च न घटत्वाभाव इति घटत्वादिनिष्ठं तद्विरहत्वं न तत्प्रतियोगित्वमिति भावः। घट एव तदभावप्रतियोगीत्यादौ अभावपदं लक्षणया घटादिरूपसमभिव्याहृतपदार्थविशेषिताभावपरं, प्रतियोगिपदं ज्ञानप्रतिबन्धकज्ञानविषयत्वावच्छिन्नार्थकं, तदेकदेशज्ञाने वाभावविषयकत्वान्वयः, स्वत्वाननुगमेऽपि न प्रतियोगिपदशक्त्यानन्त्यप्रसङ्गः, न वा अभावपदार्थान्वयानुपपत्तिः इति ध्येयम्। सम्बन्धविशेषावच्छिन्नत्वस्य व्यापकताघटकप्रतियोगितायां अवश्यनिवेशनीयतया भेदप्रतियोगितामादायोक्तदोषासम्भवेन संसर्गाभावनिवेशवैयर्थ्यमित्यत्यन्तपदं सम्बन्धविशेषावच्छिन्नत्वलाभार्थकतया एव व्याख्येयं तथाच प्रकृतोपयोगिप्रतियोगितामात्रस्य लक्षणत्वेऽपि न क्षतिरित्याह, 'वस्तुतस्त्वित्यादिना, 'एकसम्बन्धावच्छिन्नाया इति, तथाच साध्यवन्निष्ठाभावप्रतियोगितासामान्यानवच्छेदकत्वनिवेशे प्रतियोगितावच्छेदकमात्रस्यैव साध्यवन्निष्ठयत्किञ्चित्सम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकतया तादृशप्रतियोगितासामान्यानवच्छेदकसाध्यवन्निष्ठाभावप्रतियोगितावच्छेदकाप्रसिद्धिः। न चायोगो-

(१) न चैवमित्यादिः इत्यवधेयमित्यन्तः पाठः कस्मिंश्चिदादर्शपुस्तके नास्ति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लकभेदत्वादिकमेव तथा धूमादिमति संयोगादिव्यधिकरणसम्बन्धावच्छिन्नायोगोलकभेदाद्यभावसत्त्वेऽपि तत्प्रतियोगितायां लाघवेन शुद्धभेदत्वादेरवच्छेदकत्वोपगमात् इति वाच्यम्। विषयितासम्बन्धेन कालिकसम्बन्धेन वा अयोगोलकभेदाभावस्य प्रतियोगितायामेवायोगोलकभेदत्वादेरवच्छेदकतया तस्य साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वासम्भवात् अयोगोलकभेदाविषयकभेदान्तरविषयकज्ञाने विषयितासम्बन्धेन भेदत्वरूपसामान्यधर्म्मावच्छिन्नाभावासम्भवेन तत्साधारणताद्दशसम्बन्धावच्छिन्नायोगोलकभेदाद्यभावस्य भेदसामान्यानधिकरणदेशाप्रसिद्ध्या कालिकसम्बन्धावच्छिन्नभेदत्वावच्छिन्नाभावासम्भवेन अयोगोलकावच्छेदेन कालवृत्तेः कालिकसम्बन्धावच्छिन्नायोगोलकभेदाद्यभावस्य च शुद्धभेदत्वादेरवच्छेदकत्वायोगात्। यदि च यत्किञ्चित्सम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकत्वं निवेश्य अयोगोलकभेदत्वादेस्तथात्वमुपपद्यते, तदा वह्निमान् धूमादित्यादौ वह्न्यादिमन्निष्ठसंयोगसमवाय-दैशिकसम्बन्धावच्छिन्नाभावप्रतियोगिता(१)नवच्छेदकधूमादिमन्निष्ठसमवाय--संयोग--दैशिकविशेषणतासम्बन्धावच्छिन्नाभावप्रतियोगिता(२)वच्छेदक-वह्नित्व द्रव्यत्वत्व-ह्रदभेदत्वाद्यवच्छिन्नस्योपाधितापत्तिरिति भावः। 'यत्सम्बन्धावच्छिन्नाया इति, तथाच संयोगादिसम्बन्धावच्छिन्नवह्न्यादिमन्निष्ठाभावप्रतियोगितानवच्छेदकवह्नित्वादेः साधनवन्निष्ठतत्सम्बन्धावच्छिन्नाभावप्रतियोगिता-

(१) संयोग-समवायादि-कालिकसम्बन्धावच्छिन्नाभावप्रतियोगितेति पा०।

(२) संयोग-समवाय-कालिकादिसम्बन्धावच्छिन्नाभावप्रतियोगितेति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नवच्छेदकत्वसम्भवात् धूमादिमन्निष्ठविशेषणताविशेषादिसम्बन्धावच्छिन्नाभावप्रतियोगितानवच्छेदकायोगोलकभेदत्वादेर्वह्न्यादिमन्निष्ठतादृशसम्बन्धावच्छिन्नाभावप्रतियोगितावच्छेदकत्वाच्च न कश्चिद्दोष इति भावः । 'संसर्गाभावत्वमनुपादेयमेवेति अयोगोलभेदत्वादेर्धूमादिमन्निष्ठभेदप्रतियोगितावच्छेदकत्वेऽपि विशेषणताविशेषादिसम्बन्धघटितनिरुक्तोपाधितावच्छेदकत्वस्य तत्राचतत्वात् इति भावः । 'स च' अस्वरसः, 'व्यधिकरणसम्बन्धेनेति, तथाच तादृशव्यधिकरणसम्बन्धेन संयोगादिना यस्य रूपविशेषादेः क्वचिदपि कस्यचिद्भ्रमो न जातस्तस्य तादृशसम्बन्धावच्छिन्नाभावप्रतियोगित्वानुपपत्तिः । प्रतियोगितावच्छेदकसम्बन्धेनैव प्रतियोगिप्रकारकज्ञानस्याभावधीविरोधित्वात् तादृशाभावधीप्रतिबन्धकज्ञानस्यैवाप्रसिद्धेः । यद्यपि समानधर्म्मिकयोरेवाभाव-प्रतियोगिमत्ताज्ञानयोः प्रतिबध्य-प्रतिबन्धकभाव इति समानाधिकरणसम्बन्धावच्छिन्नाभावस्थलेऽपि विरोधिनोरभाव-प्रतियोगिज्ञानयोरेकतरस्य भ्रमत्वनियम इति यादृशाभावस्य तत्प्रतियोगिनो वा भ्रमो न कदाचिदपि प्रसिद्धः तदभावप्रतियोगित्वाव्याप्तिः सम्भवति तथापि समानविशेष्यताप्रत्यासत्त्या प्रतिबध्य-प्रतिबन्धकभावोपगमे भिन्नधर्म्मिकज्ञानस्यापि प्रतिबन्धकतावच्छेदकाक्रान्ततया तादृशभ्रमात्मकज्ञानमादाय लक्षणसमन्वयः सम्भवति इति व्यधिकरणसम्बन्धावच्छिन्नाभावानुधावनम् । ननु प्रतिबन्धकत्वं न कारणीभूताभावप्रतियोगित्वमपित्वेककालावच्छेदेनैकत्रावर्त्तमानत्वमिति प्रागेवोक्तम् एवञ्च यादृशव्यधिकरणसम्बन्धेन यस्य प्रतियोगिनो-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भ्रमोऽप्रसिद्धः तादृशसम्बन्धावच्छिन्नतदभावज्ञानासमानकालीनत-त्प्रतियोगिविषयकसम्बन्धान्तरावगाहिप्रमामादायैव लक्षणसङ्गतिः सम्भवतीत्यतो दूषणान्तरमाह, 'स्वाभावेति, सम्बन्धित्वस्य नियम-घटिततया गौरवादाह, 'स्वाभावज्ञानेति, 'लघोरित्यस्य स्वाभाव-ग्रहप्रतिबन्धकज्ञानविषयत्वापेक्षयेत्यादिः, 'सर्व्वत्र सम्भवित्वादिति सर्व्वत्र प्रतियोगितास्वरूपत्वसम्भवादित्यर्थः, तदभावज्ञानविषयोदा-सीनेऽतिप्रसङ्गस्य स्वांशेनैवायोगात् (१) इति भावः। ननु तथैवा-स्त्वित्यत आह, 'स्वाभावेत्यत्रेति, 'स्वाभावेत्यादाविति पाठे यथा-श्रुतविरहत्वनिवेशपक्षे अभावविरहस्येत्यस्य परिग्रहः, 'षष्ठ्यर्थप्रति-योगितायाः इति, स्वस्याभावः स्वाभावः स्वाभाव इति षष्ठ्यर्थस्य प्रतियोगित्वातिरिक्तानतिप्रसक्तसम्बन्धस्य दुर्व्वचत्वात् इति भावः। 'तत्र स्वरूपसम्बन्धस्यैवेति, अन्यथा आत्माश्रयादिति भावः। यद्यपि 'स्वाभावेत्यत्र प्रतियोगितायाः सम्बन्धविधया निवेशे सम्ब-न्धज्ञानस्य विशिष्टवैशिष्ट्यबुद्धिहेतुतया 'स्वाभावेत्यत्र स्वाभावा-भावत्वरूपप्रतियोगितानिवेशेऽपि तज्ज्ञानात् पूर्व्वं न तज्ज्ञाना-पेक्षति न दुर्ज्ञेयता। तथापि विशिष्टसम्बन्धे सम्बन्धस्यापि घटकतया सम्बन्धविधया भासमानस्य तस्य शरीरेऽपि तस्य सम्बन्धविधया भानं तादृशरीत्या भानान्तर्गतमपि सम्बन्धविधया तज्ज्ञानमिति विषयतानवस्था दुर्व्वारेव। 'तथात्वौचित्यात्' प्रतियोगितौचित्यात्। न चाभावे स्वस्य सम्बन्धानुयोगिता न तु प्रतियोगिता सा च स्वरूपसम्बन्धरूपैवास्तां प्रतियोगिता तु निरुक्तरूपेत्याशङ्क्य, अनु-

(१) स्वांशनिवेशेनैवायोगादिति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

योगितायाः स्वरूपसम्बन्धात्मकत्वे निरुक्तापेक्षया लघोस्तन्निरूपकत्वस्यैव प्रतियोगितात्वौचित्यात्। प्रकारान्तरेण प्रतियोगिताप्रवेशमाह, 'अभावत्वेति, अभावत्वं, द्रव्यादिप्रतियोगिकभेदवत्त्वं, 'प्रतिबन्धकत्वम्' एकत्र वर्त्तमानत्वप्रतियोगिकाभाव इति भावः। नन्वभावादिव्यवहारगोचरत्वमेवाभावत्वं न तु प्रतियोगिताघटितनिरुक्तरूपमित्यत-आह, 'तथाविधेति, 'विना प्रतियोगितामिति प्रतियोगितान्तर्भावमन्तरेणेत्यर्थः, तथाविधव्यवहारगोचरत्वम् अभावपदप्रतिपाद्यत्वं तत्पदशक्तिविषयत्वरूपं वा उभयथापि जन्यताघटितं प्रतिपाद्यत्वस्य जन्यप्रतिपत्तिविषयत्वरूपत्वात्, तत्पदशक्तेश्च पदजन्यबोधविषयत्वप्रकारकभगवदिच्छारूपत्वात्, जन्यता च व्याप्तिघटिता, तस्याश्च प्रतियोगिताघटितत्वादिति भावः। एवञ्च प्रतियोगिता स्वरूपसम्बन्धविशेष इति पूर्व्वमत एव मणिकारस्य निर्भर इति सूचितम्। इदमवधेयं घटो नास्तीत्यादिबुद्धावभावांशे प्रतियोगिनः प्रकारतया भानान्मण्यभावादेः कारणत्वे प्रतियोगिनोऽवच्छेदकत्वाच्चाभावनिष्ठप्रतियोगित्वनिरूपितानुयोगित्वाख्यस्वरूपसम्बन्धोऽवश्यमङ्गीकार्य्यः प्रतियोगिन्यभावविशिष्टबुद्ध्यात्मकोऽभावीयो घटइत्यादिप्रत्ययस्तु नानुभवसिद्धः इत्यभावीयप्रतियोगित्वाख्यस्वरूपसम्बन्धे मानाभावः प्रतियोगिव्यवहारस्तु अनुयोगितानिरूपकत्वमेवावलम्बते ध्वंसस्य च प्रतियोगिनिष्ठप्रत्यासत्त्या प्रतियोगिजन्यत्वानुरोधेन तस्य प्रतियोगिनिष्ठसम्बन्धोपगम आवश्यक इति चेदस्तु, तथाप्यभावान्तरस्य तादृशसम्बन्धो निष्प्रमाणक एव। न च जन्यत्वस्य

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यत्र कार्य्यतावच्छेदकता तत्र प्रागभावनिष्ठानुयोगितानिरूपकत्वापेक्षया प्रतियोगितासम्बन्धेन प्रागभावे तस्य तस्य तथात्वे लाघवात् प्रागभावस्यापि तादृशसम्बन्धः सिद्ध इति वाच्यम्। तत्र निरूपकतासम्बन्धेनानुयोगिताविशेषरूपप्रागभावत्वस्यैवावच्छेदकत्वोपगमात्। अन्यथा प्रागभावनिष्ठात्यन्ताभावादिभेदस्याधिकरणस्वरूपतामते जन्यत्वस्यात्यन्ताभावादिसाधारण्यापत्तेः गौरवाच्चेति।

तत्त्वचिन्तामणिः।

यावत्साधनाव्यापकमव्यापकं यत्साध्यस्य यावत्साध्यव्यापकं व्यापकं वा यस्य तत्त्वं तदिति चेन्न, सोपाधेरपि तथात्वात्, तथाहि साधनस्य वह्नेरव्यापकं यावदार्द्रेन्धनन्तत् प्रत्येकमव्यापकं साध्यधूमस्य द्वितीये साध्यधूमस्य व्यापकमार्द्रेन्धनं तद्व्यापकं महानसीयवह्नेः। नापि साध्यं यावद्व्यभिचारि तदव्यभिचारित्वमनौपाधिकत्वं, साध्याव्यभिचारित्वस्यैव गमकत्वसम्भवात्, तच्च दूषितम्। नापि कार्त्स्न्येन सम्बन्धोव्याप्तिः एकव्यक्तिके तदभावात् नानाव्यक्तिकेऽपि सकलधूमसम्बन्धस्य प्रत्येकवह्नावभावात्। अतएव न कार्त्स्न्येन साध्येन सम्बन्धोव्याप्तिः विषमव्याप्ते तदभावाच्च। न च यावत्साधनाश्रयाश्रितसाध्यसम्बन्धः, साधनाश्रये

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

महानसादौ सकले प्रत्येकं वह्नेराश्रितत्वाभावात्। नापि साधनसमानाधिकरणयावद्धर्म्मसमानाधिकरण-साध्यसामानाधिकरण्यं, यावद्धर्म्मसामानाधिकरण्यं हि यावत्तद्धर्म्माधिकरणाधिकरणत्वं तच्चाप्रसिद्धं साधन-समानाधिकरणसकलमहानसत्वाद्यधिकरणाप्रतीतेः। नापि स्वाभाविकः सम्बन्धोव्याप्तिः, स्वभावजन्यत्वे तदा-श्रितत्वादौ वा अव्याप्त्यतिव्याप्तिः। नाप्यविनाभावः, केवलान्वयिन्यभावात्। अथ सम्बन्धमात्रं व्याप्तिः व्यभिचारिसम्बन्धस्यापि केनचित् सह व्याप्तित्वात् धूमादिव्याप्तिस्तु विशिष्यैव निर्व्वक्तव्येति तन्न, लिङ्ग-परामर्शविषयव्याप्तिस्वरूपनिरूपणप्रस्तावे लक्षणाभि-धानस्यार्थान्तरत्वात्। न च सम्बन्धमात्रं तथा, तद्-बोधादनुमित्यनुत्पत्तेः।

दीधितिः।

यत्साध्यस्य यत्समानाधिकरणसाध्यस्य। 'तथाही-त्यादि, यत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छे-दकं यावत् साध्यसमानाधिकरणात्यन्ताभावप्रतियोगि-तावच्छेदकम् साध्यसमानाधिकरणात्यन्ताभावप्रतियो-गितानवच्छेदकं यावत् यत्समानाधिकरणात्यन्ताभाव-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

प्रतियोगितानवच्छेदकं तत्त्वमित्यर्थे तु नोक्तदोषइति ध्येयम्। प्रतियोगितयोस्त्वैकसम्बन्धावच्छिन्नत्वं वा वक्तव्यम् तेन प्रतियोगितावच्छेदकमात्रस्यैव यत्किञ्चित्सम्बन्धावच्छिन्नसाध्यसमानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकत्वेऽपि एकसम्बन्धावच्छिन्नसाध्यसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदकस्य सम्बन्धान्तरावच्छिन्नसाधनसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वेऽपि च न क्षतिः। व्यभिचारिणि तु यत्राधिकरणे व्यभिचारो विशेषणताविशेषावच्छिन्नतन्निष्ठाभावप्रतियोगितावच्छेदकं साध्यवत्त्वप्रकारकप्रमाविषयत्वत्वम् विशेषणताविशेषावच्छिन्नसाध्यसमानाधिकरणाभावप्रतियोगितानवच्छेदकमिति नातिप्रसङ्गः। वस्तुतो हेतुसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकं यावद्यद्धर्म्मावच्छिन्नसमानाधिकरणान्योन्याभावप्रतियोगितावच्छेदकं तद्धर्म्मावच्छिन्नसामानाधिकरण्यम् साध्यसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकं यावत्स्वसमानाधिकरणान्योन्याभावप्रतियोगितानवच्छेदकं तत्त्वं वा व्याप्तिरिति ध्येयम्। 'साध्यमिति यावतां तेषामित्यर्थः। 'दूषितं' केवलान्व-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यिन्यव्याप्त्या, सा च यथोक्तलक्षणेऽपि गौरवं परमति-
रिच्यत इति। कार्त्स्न्यं साधनस्य, साध्यस्य, साध्याश्रयस्य,
साध्यसमानाधिकरणस्य, साधनाश्रयस्य, साधनसमाना-
धिकरणस्य वा, आद्ये कृत्स्नसाधनसामानाधिकरण्यं
साध्ये, कृत्स्नेषु साधनेषु साध्यसामानाधिकरण्यं वार्थः,
प्रथमे 'एकेति, 'नानेति च, व्याप्तेश्चाहेतुवृत्तित्वम् पृथिवी
पृथिवीत्वव्यापकजातेरित्यादावतिव्याप्तिश्च। अतएव ने-
तरः। अर्थाभिधानपूर्व्वकं द्वितीयं निरस्यति, 'अतएवेति,
'अतएव' एकव्यक्तिसाध्यकाव्याप्तेरेव, विषमव्याप्ते सम-
व्याप्तेऽपि च संख्यापरिमाणादावेकत्र साधने सकल-
साध्यसम्बन्धस्याभावात् भावाच्च शब्दवान् द्रव्यत्वादि-
त्यादौ। तृतीये च साध्याश्रययावद्वृत्तित्वं, चतुर्थे साध्य-
समानाधिकरणयावत्सामानाधिकरण्यमर्थः, तत्र च
यथासम्भवमेकमात्रवृत्तिसाध्यके वह्न्यादौ साध्ये धुमा-
दावव्याप्तिरतिव्याप्तिश्च सत्त्वादौ। अर्थपरिष्कारपूर्व्वकं
पञ्चमं निरस्यति, 'नचेति। एकमात्रवृत्तिसाधने चा-
व्याप्तिश्च, तथैव षष्ठं निरस्यति, 'नापीति, तादृशानां
सर्व्वेषां महानसत्वादीनां प्रत्येकनिरूपितान्यपि सामा-
नाधिकरण्यानि न कुत्रापि वह्नौ। अथ यद्धर्म्मावच्छिन्न-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सामानाधिकरण्यत्वेन साधनसामानाधिकरण्यव्यापकत्वं तद्धर्म्मावलीढ़सामानाधिकरण्यं विवक्षितमिति चेत्, इतोऽपि लघुतया साधनव्यापकतावच्छेदकरूपावच्छिन्नसामानाधिकरण्यमेव व्याप्तिरिति सिद्धान्तयिष्यते। 'अविनेति, साध्यं विना साध्याभाववति योऽभावोऽवृत्तिस्तद्विरहः साध्यं विना अभावः साध्याभावव्यापकीभूताभावप्रतियोगित्वमिति वा। 'अथेति, 'सम्बन्धः' सामानाधिकरण्यं व्यभिचारिसम्बन्धस्य केनचित्किञ्चिद्रूपावच्छिन्नेन धूमादेरपि द्रव्यत्वादिना वह्निव्यापकत्वात्। 'तद्बोधादिति। नच व्यभिचाराग्रहसहकृतस्तद्बोधस्तथा, व्यभिचार-तदव्यतिरेकयोः अनुपस्थितावपि समानाधिकरणधर्म्मवत्ताज्ञानमात्रादनुमित्यनुत्पादस्य सर्व्वानुभवसिद्धत्वात् हेत्वन्तरे तत्रैव च रूपान्तरेण व्यभिचारग्रहे हेतुतावच्छेदकाग्रहेऽप्यनुमित्युत्पादाच्च, विवदन्ते च सामानाधिकरण्यज्ञानस्यैव हेतुतायां, व्यभिचारज्ञानाभावकारणत्वमपेक्ष्य कारणीभूतसामाधिकरण्यज्ञाने लाघवेनाव्यभिचारस्य विषयतयावच्छेदकत्वमुचितम्। नच व्यभिचारसंशयेऽनुमित्यनुत्पादादव्यभिचारनिश्चयत्वेन कारणत्वोक्तौ गौरवम्, व्यभिचारज्ञानस्य हि भ्रम-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्वनिश्चयदशायामेवाविरोधितया भ्रमत्वेनानिश्चीयमानस्य विरोधित्वं वाच्यम् अव्यभिचारनिश्चयस्य च भ्रमत्वशङ्कायामप्यनुमित्यजनकतया भ्रमत्वेनागृह्यमाणस्यैव हेतुत्वमिति तवैव गौरवात् नानाविधव्यभिचारज्ञानाभावानां नियतपूर्व्ववर्त्तित्वेन क्लृप्तानामपि हेतुत्वमपेक्ष्य वक्ष्यमाणैकविधाव्यभिचारज्ञानस्यैव हेतुत्वं युक्तमित्यप्याहुः।

गादाधरी विवृतिः।

'यत्साध्यस्येत्यत्र कर्म्मधारयसमासे व्याप्तेर्हेतुनिष्ठत्वानुपपत्तिः इति षष्ठीतत्पुरुषमवलम्ब्य व्याचष्टे, 'यत्समानाधिकरणेति, 'तथाहीत्यादिना दर्शितमुभयविधानौपाधिकत्वस्य सोपाधौ अतिप्रसङ्गमुद्धरति, 'यत्समानाधिकरणात्यन्ताभावेत्यादिना, अत्यन्तपदानि तत्पदमस्तीत्युपात्तानि न तु विवक्षितार्थकानि, सम्बन्धविशेषावच्छिन्नत्वेन प्रतियोगिताया अग्रे विशेषणीयत्वेन व्यावृत्त्यभावात्। 'नोक्तदोष इति, आर्द्रेन्धनायोगोलकान्यत्वादीनां धूमादिरूपसाध्यवन्निष्ठतत्तद्व्यक्तित्वोभयत्वावच्छिन्नप्रतियोगितावत्त्वेऽपि तत्त्वस्य साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वात् तादृशधर्म्मस्य महानसीयवह्न्यादिरूपयत्किञ्चित्साधनवन्निष्ठाभावप्रतियोगितानवच्छेदकत्वेऽपि साधनवन्निष्ठाभावप्रतियोगितावच्छेदकत्वसामान्याभाववत्त्वाभावादिति भावः। 'एकसम्बन्धावच्छिन्नत्वमिति साध-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नसमानाधिकरणाभावीययद्यत्सम्बन्धावच्छिन्नप्रतियोगितावच्छेद-कत्वं यस्य तस्य साध्यवन्निष्ठाभावीयतत्तत्सम्बन्धावच्छिन्नप्रतियोगि-तावच्छेदकत्वं साध्यवन्निष्ठाभावीययद्यत्सम्बन्धावच्छिन्नप्रतियोगिता-नवच्छेदकत्वं यस्य तस्य साधनवन्निष्ठाभावीयतत्तत्सम्बन्धावच्छिन्न-प्रतियोगितानवच्छेदकत्वमित्येवं विवक्षणीयमित्यर्थः। विशेषणता-विशेषसम्बन्धमात्रनिवेशेनैव सामञ्जस्ये सम्बन्धान्तरनिवेशनमफल-मित्याशयेनाह, 'विशेषणतेति। प्रथमलक्षणे सम्बन्धविवक्षाया: फलमाह, 'प्रतियोगितावच्छेदकमात्रस्यैवेति, मात्रपदं कृत्स्नार्थकं, तथाच सुतरां साधनसमानाधिकरणाभावप्रतियोगितावच्छेद-कसामान्यस्य साध्यसमानाधिकरणाभावप्रतियोगितावच्छेदकत्व-मिति सम्बन्धाविवक्षणे अतिव्याप्तिः स्यादिति भावः। लघुधर्म्म-समनियतगुरुधर्म्मस्य साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकत्वा-सम्भवात् धर्म्ममात्रमुपेक्ष्य प्रतियोगितावच्छेदकधर्म्मानुधावनम्। यद्यपि कम्बुग्रीवादिमत्त्वादेरपि विषयितासम्बन्धावच्छिन्नतद्वि-शिष्टाभावप्रतियोगितावच्छेदकत्वं सम्भवति घटत्वादिविशिष्ट-विषयकेऽपि कम्बुग्रीवादिमत्त्वाद्यप्रकारकज्ञानादौ तद्विशिष्टस्य विषयितासम्बन्धावच्छिन्नाभावसत्त्वेन लघुघटत्वादेस्तत्प्रतियोगि-तावच्छेदकत्वसम्भवात् तथापि विषयिताया वृत्त्यनियामकत्वेना-भावप्रतियोगितावच्छेदकसम्बन्धत्वं नास्तीत्यभिप्रायेणेदम्। द्वितीय-लक्षणे सम्बन्धविवक्षाफलं दर्शयति, 'एकसम्बन्धेति, तथाच यदि यत्किञ्चित्सम्बन्धावच्छिन्नसाध्यसमानाधिकरणाभावप्रतियोगितान-वच्छेदकं यत् तत्र साधनसमानाधिकरणाभावप्रतियोगिता-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सामान्यावच्छेदकत्वाभावो विवक्ष्यते तदा असम्भवः स्यादिति भावः। यदि साधनसमानाधिकरणाभावीययत्किञ्चित्सम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वाभावो निवेश्यते तत्र उभयदल एव प्रतियोगितासामान्यं वा तदा पुनरतिव्याप्तिरेवेति हृदयम्। उभयलक्षण एव सम्बन्धविवक्षणे व्यभिचारिण्यतिव्याप्तिवारणप्रकारं दर्शयति, 'व्यभिचारिणि त्विति,'तन्निष्ठाभावप्रतियोगितावच्छेदकमिति, तथाच साधनवन्निष्ठाभावप्रतियोगितावच्छेदकेषु साध्यवन्निष्ठाभावप्रतियोगितानवच्छेदकेषु यावत्सु साध्यवत्त्वप्रकारकप्रमाविषयत्वत्वान्तर्भावात् तत्र साध्यवन्निष्ठाभावप्रतियोगितावच्छेदकत्व--साधनवन्निष्ठाभाप्रतियोगितानवच्छेदकत्वयोरभावाल्लक्षणे नातिव्याप्तिरिति भावः। अत्यन्ताभावघटितयावत्साधनाव्यापकाव्यापककसाध्यसमानाधिकरण्य–यावत्साध्यव्यापकव्यापकत्वयोरभावप्रतियोगितावच्छेदसम्बन्धविशेषघटितत्वेन गुरुतया तदघटितमन्योन्याभावगर्भलक्षणद्वयमाह, 'वस्तुत इति, यद्यप्यन्योन्यभावगर्भलक्षणेऽपि प्रतियोगितावच्छेदकयोरेकसम्बन्धावच्छिन्नत्वस्य विशेषणताविशेषावच्छिन्नत्वस्य वा निवेशनमावश्यकमन्यथा अयोगोलोकान्यत्वादेरपि धूमाद्यात्मकसाध्यवन्निष्ठस्य विषयितादिसम्बन्धेन स्वावच्छिन्नभेदस्य प्रतियोगितावच्छेदकतया अतिप्रसङ्गात् अत्यन्ताभावघटितलक्षणे च तादृशसम्बन्धेन चायोगोलकभेदत्वावच्छिन्नज्ञानादेर्योऽत्यन्ताभावस्तत्प्रतियोगितावच्छेदकतामादायातिप्रसङ्गो न सम्भवति विशेषणताविशेषसम्बन्धावच्छिन्नप्रतियोगिताकस्य तादृशाभावस्य प्रतियोगितायां शुद्ध-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भेदत्वादेरवच्छेदकत्वसम्भवेन गुरोरयोगोलकभेदत्वादेरनवच्छेदकत्वादिति तत्र प्रतियोगितावच्छेदकतावच्छेदकसम्बन्धनिवेशो नास्ति तथाचान्योन्याभावगर्भव्याप्तौ लाघवानवकाशः, तथापि गुरुधर्म्मस्य प्रतियोगितावच्छेदकत्वमते अत्यन्ताभावगर्भलक्षणेऽपि प्रतियोगितावच्छेदकतावच्छेदकसम्बन्धनिवेशनमावश्यकम् एवञ्च भेदत्वादेर्विषयितासम्बन्धेन प्रतियोगितावच्छेदकत्वे अयोगोलकभेदत्वादेः प्रतियोगितावच्छेदकत्वनिर्व्वाहः विशेष्यपर्य्याप्तस्यापि विशिष्टानुयोगिकाभावानभ्युपगमादिति तादृशधर्म्मस्य साध्यव्यापकतावच्छेदकत्वनिर्व्वाहाद्द्वितीये अत्यन्ताभावघटितलक्षणे तन्निवेशस्यावश्यकता सर्व्वथैवेत्यभिप्रायेणेदम्। 'वस्तुतस्त्वित्यादिर्भ्रान्तकल्पितः पाठ इत्यपि वदन्ति। 'यावदव्यभिचारितदव्यभिचारित्वं इत्यत्रोभयत्र बहुव्रीहिभ्रमनिरासाय व्याचष्टे, 'यावतां तेषामिति, 'दूषितमित्यत्र केन दोषेणेत्याकाङ्क्षायां पूरयति, 'केवलान्वयिन्यव्याप्त्येति। साध्याव्यभिचारित्वमात्रे ध्रौव्ये केवलान्वयिन्यव्याप्तिः प्रसज्यते इत्यत एव शेषं स्वार्थक्यं भविष्यतीत्याकाङ्क्षायामाह, 'सा चेति केवलान्वय्यव्याप्तिश्चेत्यर्थः,'यथोक्तलक्षणे' यावतां साध्यमव्यभिचारि तेषामव्यभिचारित्वरूपे, केवलान्वयिसाध्यं व्यतिरेकिणी व्यभिचार्य्येव केवलान्वयिनश्च व्यभिचार एवासिद्ध इति तदव्यभिचारित्वमपि तथेति साध्यं यस्याव्यभिचारि तादृशवस्तुनोऽप्रसिद्धेरिति भावः। 'कार्त्स्न्येन सम्बन्ध इत्यत्र साधन-साध्य-साधनाश्रय-साधनसमानाधिकरणधर्म्मेषु कार्त्स्न्यविशेषणतापक्षाः मूलकृता दूषिताः न तु साध्याश्रय-तत्समानाधिकरणयोस्तद्विशेषणत्वपक्षौ,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अतो न्यूनताभङ्गाय स्वमतौ दूषयितुं तावदन्तर्भाव्य वितर्कयति, 'कार्त्स्न्यमित्यादिना, 'साधनसमानाधिकरणस्य वा', विवक्षितमिति शेषः। सकलधूमसम्बन्धस्य प्रत्येकं वह्नावभावात् इत्यभिधानेन साध्यानुयोगिककृत्स्नसाधनसम्बन्धस्य व्याप्तितापक्षस्य दूषणे मूलस्य तात्पर्यं प्रतीयते तथाच कृत्स्नसाधनानुयोगिकसाध्यसम्बन्धस्यादूषणेन न्यूनतां परिहर्त्तुं तत्पक्षं दूषयिष्यन् साधनस्य कार्त्स्न्यमन्तर्भाव्य वितर्कयति, 'आद्य इति, प्रथमपक्षे मूलोक्तदूषणद्वयं सङ्गमय्याधिकदूषणद्वयमाह, 'व्याप्तेश्चेति, 'पृथिवीति, पृथिवीवृत्तिघटत्व-पटत्वादिसकलधर्म्माधिकरणाप्रसिद्ध्या सकलतत्सामानाधिकरण्याप्रसिद्धिरतः पृथिवीवृत्तित्वमुपेक्ष्य तत्र व्यापकतानुधावनं, पृथिवीत्वव्यापकत्वं पृथिवीनिष्ठान्योन्याभावप्रतियोगितानवच्छेदकत्वमवृत्तिसाधारणमिति तेन रूपेण हेतुत्वे अवृत्तेरपि सकलसाधनान्तर्गततया तदधिकरणाप्रसिद्ध्या नातिव्याप्तिप्रसक्तिरतो जातिपदं समवेतार्थकं, 'अतएव' एकव्यक्तिसाधनाव्याप्तिसहितदर्शितातिव्याप्तेरेव, 'इतरः' कृत्स्नः साधने साध्यसम्बन्धो व्याप्तिरितिपक्षः। 'द्वितीयं' साध्ये कार्त्स्न्यविशेषणपक्षं, 'एकव्यक्तिके तदभावादित्यत्र एकव्यक्तिपदं तादृशसाधनपरं, तस्य साधने कार्त्स्न्यविशेषणपक्षदूषणपरत्वात्। तथाचातएवेत्यस्य तादृशदूषणपरत्वासम्भवात् एकव्यक्तिसाध्यकाव्याप्तिपरतया व्याचष्टे, 'अतएवेति, न्यूनताभङ्गाय पूरयति, 'समव्याप्तेऽपि चेति, 'संख्यापरिमाणादौ' संख्यादिसाध्यकपरिमाणादौ, 'शब्दवानिति, रूपादेः साध्यत्वे सकलतदधिकरणाप्रसिद्ध्या नातिव्याप्तिरतः शब्दसाध्यकानुसरणं, तत्र गगन-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

स्यैव सकलशब्दाधिकरणत्वात्। तृतीय-चतुर्थयोरर्थाभिधानपूर्व्वकं दूषणमाह, 'तृतीये चेत्यादिना, एकमात्रवृत्तिसाध्यके यावत्साध्याश्रयाप्रसिद्धया दोषस्तृतीय एव न चतुर्थे वह्निमान् सत्त्वादित्यादौ अतिव्याप्तिरपि तत्रैव, चतुर्थे यावत्साध्यसमानाधिकरणपर्व्वतत्व-महानसत्वाद्यधिकरणाप्रसिद्धया तदनवकाशात् अतः 'यथा-सम्भवमिति, 'धूमादावव्याप्तिरिति, सकलवह्निमति प्रत्येकधूमस्यावृत्तेः वह्निसमानाधिकरणयावद्धर्म्माधिकरणाप्रसिद्धेश्चेति भावः। 'सत्त्वादावित्यत्र वह्न्यादिसाध्य इत्यनुषज्यते। पञ्चमे यथाश्रुते यावत्साधनाश्रयसम्बन्धः साध्ये लभ्यते तावता व्याप्तेः साधननिष्ठत्वानिर्व्वाह इति तन्निर्व्वाहाय तादृशसाध्यसामानाधिकरण्यस्याधिकस्य निवेशनमेव 'अर्थपरिस्कारः', स्वयमधिकदूषणमाह, 'एक-मात्रवृत्तिसाधन इति, यावत्साधनाश्रयाप्रसिद्धेरिति भावः। 'तथैव' अर्थपरिष्कारपूर्व्वकमेव, अत्रापि यथाश्रुते कृत्स्नसाधन-सामानाधिकरण्यं साध्ये लभ्यते व्याप्तेर्हेतुनिष्ठतासम्पादनाय तत्-सामानाधिकरण्यस्याधिकस्य निवेशनैव परिष्कार इति बोध्यम्। ननु साधनसमानाधिकरणानां मिथो विरुद्धानां एकाधिकरणा-प्रसिद्धावपि तेषां प्रत्येकसामानाधिकरण्यमेव साध्ये निवेश्यमिति न मूलोक्तदोषावसर इत्यत आह, 'तादृशानामिति साधनसमाना-धिकरणानामित्यर्थः, 'न कुत्रापि वह्नाविति, साध्यतावच्छेदके तद्धर्म्मसमानाधिकरणवृत्तित्वं निवेश्य तद्दोषोद्धारेऽपि नानाधर्म्माव-च्छिन्नसाध्यके दण्डिमान् दण्डिसंयोगादित्यादौ कुत्रापि दण्डा-दिव्यक्तौ साध्यसमानाधिकरणानां सर्व्वेषां प्रत्येकसमानाधिक-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रणवृत्तित्वासम्भवेनैवाव्याप्तिर्ब्बोध्या। साधनसमानाधिकरणाः सर्व्वे यादृशसाध्यसमानाधिकरणास्तादृशसाध्यसमानाधिकरण्यमित्यर्थे न कोऽपि दोषः इत्याशङ्कते, 'अथेति, तत्तद्व्यक्तित्वादिना साध्यं चेद् व्यापकतावच्छेदककोटौ निवेश्यते तदा नानाव्यक्तिसाध्यकेऽव्याप्तिरतो यद्धर्म्मपदं प्रकृतसाध्यतावच्छेदकपरं, विशिष्टसत्तावान् जातेरित्यादावतिव्याप्तिवारणाय विशिष्टाधिकरणतागर्भसामानाधिकरण्यं प्रवेश्यमित्येतल्लाभाय आश्रयपदमुपेक्ष्य अवच्छिन्नपदं, धूमादिसामानाधिकरण्यस्यापि प्रमेयत्वादिना वह्न्यादिसामानाधिकरण्यव्यापकतया अतिप्रसङ्ग इति तादृशसामानाधिकरण्यत्वे व्यापकतावच्छेदकत्वपर्य्यन्तानुसरणं, साधनसामानाधिकरण्यव्यापकत्वं साधनतावच्छेदकविशिष्टसामानाधिकरण्यत्वावच्छिन्नं प्रति व्यापकत्वं, तेन धूमादिसामानाधिकरण्यत्वेन तद्वह्न्यादिसामानाधिकरण्यत्वावच्छिन्नं प्रति व्यापकत्वेऽपि गुणत्वादिसाधारणं विशिष्टसत्तात्वाश्रयसमानाधिकरण्यत्वावच्छिन्नं प्रति द्रव्यत्वादिसामानाधिकरण्यत्वेनाव्यापकत्वेऽपि न क्षतिः। परिष्कारस्यावश्यापेक्षणीयत्वे एतदपेक्षया लघोः कृत्स्नसाधनाश्रयाश्रितसाध्यसम्बन्धस्य व्यापकत्वरूपकृत्स्नपदार्थमन्तर्भाव्य परिष्कार एवोचितः, स च सिद्धान्तग्रन्थ एव करिष्यते इत्याह, 'इतोऽपीति', तथाच इदानीं यथाश्रुतार्थदूषणपर एव मूलग्रन्थ इति नासङ्गतिरिति भावः। मूलोक्तसिद्धान्तलक्षणन्त्वन्योन्याभावस्याव्याप्यवृत्तितामते द्रव्यनिष्ठसंयोगाभावोऽपि प्रतियोग्यनधिकरणीभूतहेत्वधिकरणवृत्तिरिति संयोगिद्रव्यत्वादित्यादावव्याप्त्या

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दूषयित्वा साधनसमानाधिकरणधर्म्मे कात्स्न्यंविशेषणपक्ष एव दीधितिकारेणाग्रे अवलम्बनीयः अभाववदर्थकं विनापदमत्र समस्यन्तमित्याशयेन व्याचष्टे, 'साध्याभाववतीति, साध्याभाववदवृत्तित्वमिति प्रथमलक्षणे साध्याभाववद्वृत्तिभेदो विवक्षितः अत्र तत्त्वात्यन्ताभाव इति भेद इति भावः। सत्तावान् जातेरित्यादौ साध्याभाववति हेतुतावच्छेदकसम्बन्धेन वृत्तेरप्रसिद्ध्या अव्याप्तिरित्यतोऽविनाभावमन्यथा व्याचष्टे, 'साध्यं विना अभाव इति, तथाच नञः व्यत्यासः कार्य्य इति भावः। विनाशब्दार्थोऽभाव एव न तु तद्वान् तस्य च निपातार्थतया प्रयुक्तत्वसम्बन्धेनाभावे साक्षादेवान्वयः, प्रयुक्तत्वञ्च व्यापकत्वमित्याशयेनाह, 'साध्याभावव्यापकेति, साध्यस्य संयोगादिसम्बन्धो न तदीयव्याप्तिरतो व्याचष्टे, 'सामानाधिकरण्यमिति, मूले 'व्यभिचारिसम्बन्धस्येति तद्व्यभिचारिनिष्ठतदीयसम्बन्धस्येत्यर्थः, 'केनचित् सहव्याप्तित्वादित्यत्रान्यदीयव्याप्तित्वं प्रतीयते तच्च न सम्भवतीति व्याचष्टे, 'किञ्चिद्रूपेति, तथाच रूपान्तरावच्छिन्नतद्व्याप्तित्वादित्यर्थः, तदेव दर्शयति, 'धूमादेरपीति, 'व्यापकत्वात्' व्याप्तिनिरूपकत्वात्, तथाच वह्न्यादौ धूमादिव्याप्तिरिष्टैवेति भावः। मूले 'तदबोधादिति केवलसाध्यसामानाधिकरण्यप्रकारकहेतुमत्ताज्ञानादित्यर्थः, 'अनुमित्यनुदयादिति अनुमित्युदयोपगमासम्भवात्, तथा सति द्रव्यत्वादिहेतुना ह्रदादावप्यभ्रान्तानां वह्न्याद्यनुमानोपपत्तेः उदाहरणे वीप्सितयत्पदप्रयोगवैयर्थ्यापत्तेः व्यभिचारस्य हेत्वाभासतानुपपत्तेः सर्व्वत्र मेयत्वादिना सत्प्रतिपक्षापत्तेश्चेति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भावः। ननु व्यभिचारज्ञानाभावः साक्षादेवानुमितिहेतुर्वाच्यः तथाच साध्याभावव्यभिचारिमेयत्वादेर्न सत्प्रतिपक्षोन्नायकत्व-प्रसङ्गः (१) न व्यभिचारस्य हेत्वाभासतानुपपत्तिः व्यभिचारशङ्का-निवर्त्तनेनैव उदाहरणे वीप्सापदप्रयोग इत्याशङ्कते, 'न चेति, 'तद्बोधः' साध्यसामानाधिकरण्यप्रकारकहेतुमत्ताबोधः, 'सर्व्वा-नुभवसिद्धत्वादिति, तथाच तत्रानुमित्यापत्तिरिति भावः। एव-ञ्चैतन्मते कोटिद्वयसहचरितधर्म्मद्वयदर्शनात् उभयत्र व्यभिचारा-ग्रहे संशयानुमितिप्रसङ्गोऽपि दुर्व्वारः विपरीतकोटिसमाना-धिकरणधर्म्मवत्ताज्ञानस्य विशिष्टबुद्धाविरोधित्वात् अन्यथा साधारणधर्म्मदर्शनाधीनप्रत्यक्षसंशयस्याप्युच्छेदप्रसङ्गात्। व्यभि-चारज्ञानाभावहेतुत्वं सम्भवदुक्तिकमपि नेत्याह, 'हेत्वन्तर इति द्रव्यत्वादौ वह्न्यादिव्यभिचाग्रहदशायां धूमादिलिङ्गकवह्न्याद्यनु-मितेरुत्पादादित्यर्थः, तथाच तत्साध्यकानुमितेस्तत्साध्यनिरूपित-व्यभिचाराग्रहव्यभिचारित्वान्न तत्र हेतुतासम्भव इति भावः। ननु तल्लिङ्गक-तत्साध्यकानुमितित्वस्य तल्लिङ्गधर्म्मिकव्यभिचार-ज्ञानाभावजन्यतावच्छेदकत्वोपगमे नायं व्यभिचार इत्यत आह, 'तत्रैवेति, हेताविति शेषः, 'रूपान्तरेणेति द्रव्यत्वादिप्रकारेण व्यभिचारग्रहे धूमत्वाद्यवच्छिन्नतल्लिङ्गकानुमित्युत्पत्तेरित्यर्थः। ननु तद्धर्म्मावच्छिन्नलिङ्गकाऽनुमितित्वमेव तद्धर्म्मावच्छिन्नधर्म्मिकव्यभि-चारज्ञानप्रतिबध्यतावच्छेदकं वाच्यं तथा सति नोक्तदोषावसर-इत्यत आह, 'हेतुतावच्छेदकाग्रह इति धूमत्वादिप्रकारेण पक्षधर्म्म-

(१) सत्प्रतिपक्षोपधायकत्वप्रसङ्ग इति पा०।

5149

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

ताज्ञानं विनापि अयमालोको धूमो वा इत्यादिसन्देहदशायां वह्नि-व्याप्यवान् अयमिति व्याप्तिप्रकारेण पक्षधर्म्मताज्ञानादनुमित्युत्-पत्तेरित्यर्थः, तथाच तादृशानुमितौ व्यभिचारग्रहप्रतिबध्यता-वच्छेदकनिरुक्तधर्म्मानाक्रान्तायाम् अव्यभिचारग्रहस्य हेतुताया-आवश्यकत्वेन व्यभिचाराग्रहहेतुत्वं न कुत्रापि कल्पयितुमुचितम् । न चाव्यभिचारस्य केवलान्वयिस्थलेऽप्रसिद्धया व्यतिरेकिस्थले-ऽपि केवलान्वयित्वभ्रमदशायां दुर्ग्रहतया तत्र व्यभिचारज्ञा-नाभावसहकृतसामानाधिकरण्यज्ञानादेवानुमितिरुपगन्तव्या इति वाच्यम् । स्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकतारूपस्य सिद्धान्तग्रन्थनिर्व्वाच्यस्याव्यभिचारस्य सर्व्वत्रैव सुग्रहत्वात्। साध्यस्य केवलान्वयित्वग्रहदशायाम् अनुमितिमनङ्गीकुर्व्वाणैः साध्याभाव-वदवृत्तित्वरूपाव्यभिचारज्ञानस्यानुमितिसामान्यहेतुतास्वीकारेऽपि बाधकाभावादिति भावः । ननु हेतुतावच्छेदकाग्रहस्थले साध्य-सामानाधिकरण्यप्रकारकव्यभिचारग्रहाभावसहकृतसाध्यसामाना-धिकरण्यप्रकारकपक्षधर्म्मताज्ञानादेवानुमितिः सम्भवति इति तत्राप्यव्यभिचारज्ञानहेतुत्वम् असिद्धम् एवं 'स्वसमानाधिकरणे-त्यादिसिद्धान्तग्रन्थनिर्व्वाच्यव्याप्तिज्ञानस्य हेतुतायां रासभादि-व्यावर्त्तकतत्तद्धेतुतावच्छेदकस्य साध्यसामानाधिकरण्यधर्म्मिता-वच्छेदकविधया विषयिताया अवश्यं निवेशनीयतया हेतु-तावच्छेदकधर्म्मप्रकारकज्ञानं विना अनुमितिर्न भवत्येवेत्यत-आह, 'विवदन्ते चेति, केवलान्वय्यनुमानानभ्युपगन्तारोनव्या-इति शेषः, तथाच सामानाधिकरण्यज्ञानस्यापि हेतुता नाव्य-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भिचारज्ञानहेतुतावादिभिरुपगम्यते तन्मतापेक्षया अव्यभिचारज्ञानस्थाने व्यभिचाराग्रहहेतुत्वं कल्पयतः सामानाधिकरण्यमात्रस्य व्याप्तित्वं मन्यमानस्य मते गौरवाभावेऽपि साध्याभाववदवृत्तित्वरूपाव्यभिचारज्ञानहेतुतावादिनवीनमतापेक्षया कारणताद्वयकल्पनेन गौरवं दुर्व्वारमेवेति भावः। हेतुव्यापकसाध्यसामानाधिकरण्यरूपव्याप्तिज्ञानहेतुतावादिनां सिद्धान्तिनां मतेऽपि-तन्मतापेक्षया लाघवमाह, 'व्यभिचारज्ञानेति, सिद्धान्तिमतेऽप्यव्यभिचारसामानाधिकरण्यज्ञानयोर्न्न कारणताद्वयम् अपि तु स्वसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वरूपाव्यभिचारविषयतानिरूपितत्वं साध्यसामानाधिकरण्यज्ञानहेतुतावच्छेदककोटिप्रविष्टसाध्यतावच्छेदकविषयितायां निवेश्यते तथाच कारणताया ऐक्याल्लाघवमक्षुसमेवेति भावः। इदन्त्ववधेयं पक्षभेदेन साध्यसमानाधिकरणहेतुमत्ताज्ञानहेतुतानामानन्त्यात्तत्राव्यभिचारविषयतानिवेशेऽनन्तस्थलेऽवच्छेदकगौरवं निरुक्तसाध्यतावच्छेदकविषयतायां निरुक्ताव्यभिचारविषयतानिरूपितत्वं निरुक्ताव्यभिचारविषयतायां वा साध्यतावच्छेदकविषयतानिरूपितत्वं निवेश्यते इत्यत्र विनिगमनाविरहेणानन्तपक्षभेदेनानन्तकारणताधिक्यञ्चेति पक्षविशेषमनन्तर्भाव्य सामान्यतस्तल्लिङ्गक-तत्साध्यकानुमितौ तल्लिङ्गधर्म्मिकतत्साध्यव्यभिचारज्ञानाभावत्वेन एकैककारणताकल्पनमेव सम्यक्।

अत्र केचित् व्यभिचारग्रहस्य शरीरनिष्ठप्रत्यासत्त्या आत्मनिष्ठप्रत्यासत्त्या वा प्रतिबन्धकत्वं न सम्भवति परपुरप्रवेशस्थले तच्छ-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रीरे अभिभाव्यव्यभिचारज्ञानसत्त्वेऽप्यभिभावकभूतादेरप्यनुमित्युदयात् कायव्यूहस्थले एकशरीरे आत्मनि व्यभिचारज्ञानसत्त्वेऽपि शरीरान्तरावच्छिन्ने तत्रानुमित्युदयादिति शरीरविशेषावच्छिन्नत्वं निवेश्यात्मनिष्ठप्रत्यासत्त्या व्यभिचारग्रहस्य प्रतिबन्धकता वाच्या तथाच चैत्र-मैत्रादिशरीरभेदेन तदभावस्यानन्तहेतुतापेक्षया सामानाधिकरण्य-समानावच्छेदकत्वोभयप्रत्यासत्त्या अवश्यकल्प्यसामानाधिकरण्यज्ञानहेतुतायामव्यभिचारविषयकत्वनिवेश एव लघीयान्। न च समवायसम्बन्धावच्छिन्नप्रतियोगिताकस्य व्यभिचारग्रहविरहस्य सामानाधिकरण्य-समानावच्छेदकत्वप्रत्यासत्तिभ्यां कारणताकल्पनेनैव सामञ्जस्यात् तद्धेतुतामतेऽपि शरीरभेदनिवेशनं नास्तीति वाच्यम्। तथा सति तच्छरीरावच्छेदेन तदात्मनि व्यभिचारधीसत्त्वेऽपि तदात्मनि तदभावस्यान्यावच्छेदेनान्यात्मनि तदभावस्य च तच्छरीरावच्छेदेन वृत्तेः तदात्मनि अनुमित्यापत्तेर्दुर्व्वारत्वात् उभयप्रत्यासत्त्यवच्छिन्नैकहेतुतास्थले एककारणप्रत्यासत्तेः उभयाधिकरणप्रत्यासन्नकार्य्योत्पत्तिप्रयोजकतया अव्यभिचारविषयकसामानाधिकरण्यज्ञानं यत्र कायव्यूहवत्येव तदात्मनि शरीरान्तरावच्छेदेन एतच्छरीरावच्छेदेन परपुरप्रवेशकर्त्तर्य्यात्मान्तरे तत्रैतच्छरीरावच्छेदेन एतदात्मन्यनुमित्यापत्त्यनवकाशः आत्मभेदेन ज्ञानव्यक्तिभेदादिति ज्ञानहेतुतायां शरीरभेदनिवेशमन्तरेणैवोपपत्तेः अधिकरणभेदेऽप्यभावव्यक्तिभेदाभावेन व्यभिचारज्ञानाभावहेतुतामते शरीरभेदनिवेशनं विना अतिप्रसङ्गवारणोपपत्तेरयोगात्। न च यद्देशावच्छेदेन यदा

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यदधिकरणे कार्य्यं तदवच्छेदेन तदव्यवहितपूर्व्वक्षणे तदधिकरणे कारणमित्येतादृशावच्छेदकीभूतदेशघटितव्यापकताघटितकारणत्वं व्यभिचाराग्रहे स्वीक्रियते तादृशकारणताश्रयस्य च तद्देशावच्छेदेन तदधिकरणसत्त्वं तद्देशावच्छिन्नतदधिकरणनिष्ठकार्य्योत्पादे तन्त्र-मिति तच्छरीरावच्छेदेन तदात्मनि व्यभिचारग्रहदशायां तदवच्छेदेन तदात्मनि तद्ग्रहस्य दुर्लभतया नोक्तातिप्रसङ्ग इति वाच्यम्। एवमपि यत्र महाशरीरनाशे खण्डशरीरस्योत्पादद-शायां व्यभिचारग्रहस्तत्र खण्डशरीरोत्पादद्वितीयक्षणे तदव-च्छेदेनानुमित्यापत्तेः व्यभिचाराग्रहहेतुतावादिनां दुर्व्वारत्वात् तच्छरीरस्य व्यभिचारग्रहपूर्व्वकालेऽसत्त्वेन व्यभिचारग्रहानव-च्छेदकतया तदवच्छेदेन तदग्रहस्यात्मनि सत्त्वात्। न च तदा-व्यभिचारग्रह एव न सम्भवति, शरीररूपकारणविरहादिति शङ्क्यं, शरीरावयवसाधारणचेष्टावत्त्वमात्रस्यैव ज्ञानजननौपयिक-तया शरीरासत्त्वेऽपि तदवयवावच्छेदेनैव तज्ज्ञानोत्पत्तेः सम्भवात् इत्याहुः।

व्यभिचाराग्रहस्यानुमितिहेतुतामते अनुमितिसामग्र्या अधिक-कारणताघटिततया भिन्नविषयकप्रत्यक्षादौ तत्प्रतिबन्धकतायां गौरवमित्यन्ये। अव्यभिचारग्रहहेतुतामते तत्र संशयान्यत्वप्रवे-शप्रयुक्तगौरवमाशङ्कते, 'अव्यभिचारनिश्चयत्वेनेति व्यभिचारा-प्रकारकाव्यभिचारप्रकारकज्ञानत्वेनेत्यर्थः, 'गौरवमिति, व्यभि-चाराग्रहहेतुतामते व्यभिचारसंशयस्यापि प्रतिबन्धकत्वेन सत्सा-धारणव्यभिचारग्रहत्वावच्छिन्नाभावस्यैव हेतुतया व्यभिचारग्रहे

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

संशयभेदानिवेशेन लाघवादिति भावः। व्यभिचारग्रहप्रतिबन्धकता-मते व्यभिचारग्रहे निश्चयत्वानिवेशेऽपि तदुत्तेजकीभूतभ्रमत्वज्ञाने निश्चयत्वस्य निवेशनीयतया गौरवमिति समाधत्ते, 'व्यभिचार-ज्ञानस्येति, 'भ्रमत्वनिश्चयदशायामेव' इत्येवकारेण तत्संशयदशा-यामनुमित्यविरोधित्वव्यवच्छेदः, अप्रामाण्यशङ्कया निश्चितस्यापि विषयस्य संशयोत्पत्तेः तच्छङ्काकवलितस्य निश्चयकार्य्यकारित्वं नास्तीति तथाविधस्य व्यभिचारग्रहस्य तत्संशयान्तरवदनुमितिप्रति-बन्धकताध्रौव्यादिति भावः। 'भ्रमत्वेनानिश्चीयमानस्य' भ्रमत्व-निश्चयत्वावच्छिन्नाभावविशिष्टस्य, 'विरोधित्वं', 'वाच्यं' भवता वाच्यं, 'भ्रमत्वशङ्कायामपीति, तच्छङ्कास्कन्दितज्ञानस्य विरोध्यप्रकारक-स्यापि निश्चयकार्य्यासमर्थत्वादिति भावः। अपिकारात्तन्निश्चयद-शासमुच्चयः, 'भ्रमत्वेनागृह्यमाणस्येति भ्रमत्वज्ञानत्वावच्छिन्ना-भावविशिष्टस्येत्यर्थः, एवकारेण तन्निश्चयत्वावच्छिन्नाभाववैशिष्ट्यस्य कारणतावच्छेदकत्वव्यवच्छेदः। 'तवैवेति व्यभिचाराग्रहहेतुता-वादिन एवेत्यर्थः, 'गौरवादिति, व्यभिचारिविशेष्यकत्वावच्छिन्ना-व्यभिचारप्रकारकत्वज्ञानाभावविशिष्टव्यभिचाराप्रकारकाव्यभिचा-रज्ञानत्वापेक्षया अव्यभिचारिविशेष्यकत्वावच्छिन्नव्यभिचारप्रका-रकत्वाभावाप्रकारकाव्यभिचारिविशेष्यकत्वावच्छिन्नव्यभिचारप्रका-रकत्वप्रकारकज्ञानत्वावच्छिन्नाभावविशिष्टव्यभिचारज्ञानत्वावच्छिन्ना-भावत्वरूपकारणतावच्छेदकस्य गुरुशरीरत्वादिति भावः। न च भ्रमत्वज्ञानास्कन्दितस्वविषयकभ्रमत्वज्ञानदशायामव्यभिचारग्रह-स्यानुमितिजनकतया तदवच्छेदकाभावप्रतियोगिनि भ्रमत्वज्ञाने

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भ्रमत्वान्तरग्रहाभावविशिष्टत्वं निवेश्य तादृशभ्रमत्वग्रहस्य च निश्चयत्वेनैवाभावो निवेश्यः भ्रमत्वशङ्कास्कन्दितस्यापि परामर्शीय-भ्रमत्वग्रहस्य भ्रमत्वसंशयान्तरवदनुमित्यनुत्पादप्रयोजकत्वादित्य-व्यभिचारग्रहहेतुतामते गौरवं व्यभिचारग्रहोत्तेजकभ्रमत्वनिश्चये भ्रमत्वान्तरग्रहस्य संशयसाधारणतज्ज्ञानत्वेनैवाभावनिवेशात् इति वाच्यम्। अप्रामाण्यग्रहे अप्रामाण्यान्तरग्रहाभावनिवेशे तत्राप्य-प्रामाण्यान्तरग्रहाभावस्य निवेशनीयतया तत्र भवतां निश्चयत्व-निवेशेन लाघवविरहात् (१)। न चावच्छेदककोटिप्रविष्टाप्रामा-ण्यग्रहधारायामेकैकं परित्यज्य निश्चयत्वनिवेशनमुभयमते समानम् अव्यभिचारग्रहहेतुतामते पुनरव्यभिचारग्रहे निश्चयत्वनिवेशन-मधिकमिति वाच्यम्। अव्यभिचारविशिष्टवैशिष्ट्यज्ञानत्वेनैव हेतु-ताया वक्तव्यतया तत्संशये च तद्विशिष्टवैशिष्ट्यावगाहित्वानुपगमेनै-वाव्यभिचारसंशयादनुमितिवारणसम्भवे तदंशे निश्चयत्वस्यानिवे-शादव्यभिचारविषयकाप्रामाण्यग्रहे अप्रामाण्यग्रहसत्त्वेऽप्यनुमित्यु-त्पादानुपगमेनाप्रामाण्यग्रहे अप्रामाण्यान्तरग्रहाभावस्य न विशेषण-त्वम् अन्यथा विशेषणानवस्थाप्रसङ्गादित्यपि वदन्ति। गौरवान्तरेण व्यभिचारग्रहप्रतिबन्धकतामतं दूषयतामन्येषां मतमाह, 'नानावि-'धेति हेतुनिष्ठसाध्याभाववद्वृत्तित्व-साध्यतावच्छेदकनिष्ठहेतुसमा-नाधिकरणाभावप्रतियोगितावच्छेदकत्व--तादृशप्रतियोगितानिष्ठ--साध्यतावच्छेदकावच्छिन्नत्वादिस्वरूपबहुविधेत्यर्थः, यत्किञ्चिदेक-

---

(१) भ्रमत्वनिश्चयनिवेशेन लाघवविरहादिति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विधव्यभिचारग्रहदशायामेवानुमित्यनुत्पादस्यानुभविकतया सर्व्व-विधव्यभिचारज्ञानस्यैव पृथक् पृथक् प्रतिबन्धकताया आवश्यक-त्वादिति भावः। 'नियतपूर्व्ववर्त्तित्वेन क्लृप्तानामपीति, अव्यभि-चारज्ञानहेतुतामतेऽपि तद्धेतुभूतयावद्व्यभिचारज्ञानाभावानाम-नुमितौ नियतपूर्व्ववर्त्तित्वादिति भावः। एतेन बहुष्वनन्यथा-सिद्धिकल्पनमपेक्ष्य एकधर्म्मावच्छिन्ने नियतपूर्व्ववर्त्तितासहिततत्क-ल्पने लाघवमिति ध्वनितम्।'वक्ष्यमाणैकविधेति केवलान्वयिखण्ड-नावसरे साध्याभाववदवृत्तित्वरूपलघुशरीराव्यभिचारेत्यर्थः, तादृ-शाव्यभिचारज्ञानस्यापि सर्व्वविधव्यभिचारग्रहप्रतिबध्यतया तद्धेतु-तयैव सकलव्यभिचारज्ञानदशायामनुमितिवारणसम्भवात् अव्यभि-चारान्तरापेक्षया तच्छरीरलाघवस्यैव विनिगमकतया विनिगम-नाविरहेण नानाविधाव्यभिचारधियामेव कारणत्वमित्यस्यापि वक्तुमशक्यत्वादिति भावः। 'आहुरित्यस्वरसोद्भावनं, तद्बीजन्तु असमानप्रकारतया व्यभिचारान्तरग्रहस्य साक्षादुक्ताव्यभिचार-ग्रहाविरोधितया व्यभिचारान्तरधीदशायां उक्ताव्यभिचारज्ञानसत्त्वे अनुमितिस्वीकारे गुरुशरीरव्यभिचारान्तरग्रहस्यानुमितिविरोधि-तया तावतैवोपेक्षितत्वात्, अस्माकमपि लघुशरीरसाध्याभाववद-वृत्तित्वरूपव्यभिचारग्रहाभाव एव हेतुरिति वक्तुं शक्यतया उक्त-लाघवानवकाशः व्यभिचारान्तरग्रहदशायाम् उक्ताव्यभिचारग्रह-सत्त्वेऽनुमित्यनुत्पादोऽनुभवसिद्ध इति चेत्तर्हि अव्यभिचारग्रहासत्त्वे तदनुत्पादोऽनुभवसिद्ध इत्युक्तास्मदीययुक्तिरेव जागर्त्ति किमे-तावतेति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्त्वचिन्तामणिः ।

नापि व्याप्तिपदप्रवृत्तिनिमित्तमिदं, सम्बन्धज्ञानेऽपि व्याप्तिपदाप्रयोगात् । केवलान्वयिनि केवलान्वयिधर्म्मसम्बन्धो व्यतिरेकिणि साध्यवदन्यावृत्तित्वं व्याप्तिः एतयोरनुमितिविशेषजनकत्वम् अनुमितिमात्रे पक्षधर्म्मतैव प्रयोजिका । न चातिप्रसङ्गः, विशेषसामग्रीसहिताया एव सामान्यसामग्र्याः कार्य्यजनकत्वनियमादिति केचित्, तदपि न, साध्यवदन्यावृत्तित्वस्य धूमेऽसत्त्वात् वह्निमत्पर्व्वतान्यस्मिन् धूमसत्त्वात् । न च सकलसाध्यवदन्यावृत्तित्वं, वह्निमतां प्रत्येकं तथात्वात् सर्व्वत्र लक्षणे साध्यत्व-साधनत्व-तदभिमतत्वानां व्याप्तिनिरूप्यत्वेनात्माश्रयः, साध्यत्वं हि न सिद्धिकर्म्मत्वं, सिषाधयिषाविषयत्वं वा, महानसीयवह्नौ तदभावात् । न च सामान्यतो व्याप्त्यवगमोऽस्त्येव परस्य कथमन्यथा दूषणेनासाधकतां साधयेदिति वाच्यं, स्वार्थानुमानोपयोगिव्याप्तिस्वरूपनिरूपणं विना कथायामप्रवेशादिति ।

श्रीमद्गङ्गेशोपाध्यायविरचिते तत्त्वचिन्तामणौ पूर्व्वपक्षः सम्पूर्णः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्त्वचिन्तामणि-दीधितिः।

सामानाधिकरण्यविशिष्टपक्षधर्म्मत्वं तु पक्षे साध्यग्रहं विना दुर्ग्रहमिति केवलान्वयित्वस्याग्रहे सामानाधिकरण्यमात्रग्रहादनुमित्यनुत्पत्तेस्तद्ग्रहोऽपि वाच्यः तच्च वृत्तिमदत्यन्ताभावाप्रतियोगित्वादिकमन्योन्याभावप्रतियोगितानवच्छेदकत्वं वा तथाच सर्व्वसाधारण्याय लाघवात्साधनवतस्तद्वृत्तित्वस्य वा वृत्तेरन्योन्याभावस्य वा विशेषणत्वमुचितमिति सिद्धान्तरहस्यं, शेषं केवलान्वयिखण्डने वक्ष्यामः।

इति श्रीमन्महामहोपाध्याय-रघुनाथशिरोमणि-भट्टाचार्य्यविरचितायां तत्त्वचिन्तामणिदीधितौ पूर्व्वपक्षदीधितिः सम्पूर्णा।

गादाधरी विवृतिः।

ननु केवलसामानाधिकरण्यस्य व्याप्तित्वे द्रव्यत्वादिना ह्रदादौ वह्न्याद्यनुमानापत्तिरेव बाधिका तद्वारणाय वरं साध्यसामानाधिकरण्यविशिष्टहेतुमत्ताज्ञानस्यैवानुमितिहेतुत्वमुपेयतां किमव्यभिचारज्ञानहेतुतया ह्रदादौ वह्निशून्ये वह्निसामानाधिकरण्यविशिष्टवैशिष्टासत्त्वात् व्यभिचारिणोऽपि साध्यसामानाधिकरण्यविशिष्टस्य साध्यवत्येव सत्त्वात् पक्षे विशिष्टवैशिष्ट्यग्रहे हेतौ व्यभि-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चारग्रहेऽप्यनुमितिरिष्टैव सामानाधिकरण्यविशिष्टवैशिष्ट्यस्या-व्यभिचारविशिष्टवैशिष्ट्यतुल्यत्वात् इत्याशङ्कां परिहरति, 'सामा-नाधिकरण्यविशिष्टपक्षधर्मत्वन्त्विति पक्षे साध्यसामानाधिकरण्य-विशिष्टवैशिष्ट्यन्त्वित्यर्थः, 'पक्षे साध्यग्रहं विना' साध्यनिश्चयं विना, 'दुर्ग्रहं' दुर्निश्चयं, पक्षे साध्यसन्देहदशायां साध्यसामा-नाधिकरण्यविशिष्टस्यापि सन्देह औत्सर्गिकः स साध्यनिश्चये-नैव व्यावर्त्तकधर्म्मदर्शनविधया व्यावर्त्तनीय इति भावः । तथाचान्योन्याश्रयात् तत्सामानाधिकरण्यविशिष्टवैशिष्ट्यनिश्चयस्य हेतुता न सम्भवतीत्याशयः । अथ पर्व्वते वह्निसन्देहदशायां निश्चितसाध्यकमहानसादिवृत्तितया अगृह्यमाणायां पर्व्वतीयधूम-व्यक्तौ वह्निसामानाधिकरण्यसन्देह औत्सर्गिक इति न तत्सामा-नाधिकरण्योपलक्षितधूमवत्तानिश्चयोऽपि सुघट इति कथमव्यभि-चरितसामानाधिकरण्यप्रकारकज्ञानहेतुतापक्ष एव प्रतीकार-इति चेत्, महानसीयधूमादौ प्रत्यक्षतो वह्निसामानाधिकरण्ये निश्चीयमाने लाघवज्ञानाधीनाद्धूमत्वावच्छेदेन वह्निजन्यत्वनिश्चय-रूपविशेषदर्शनतः (१) तदवच्छेदेनैव तन्निर्णयात् धूमत्वदर्शनविषय-पक्षीयधूमेऽपि साध्यसामानाधिकरण्यसंशयायोगात् धूमव्यापक-साध्यसमानाधिकरणवृत्तित्वोपलक्षितव्याप्तित्वपक्षे तत्प्रकारकहेतु-सत्त्वस्य पक्षे साध्यस्य सन्देहदशायामपि निश्चयस्य निष्प्रत्यूहतया अनुपपत्त्यनवकाशाच्च साध्यस्य केवलान्वयित्वज्ञानकालीनाया-मनुमितौ केवलान्वयिसाध्यसामानाधिकरण्यज्ञानम् अतादृशस्य

(१) वह्निसामानाधिकरण्यनिश्चयरूपविशेषदर्शनत इति पा० ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

साध्यवदन्यावृत्तित्वज्ञानं हेतुरिति मते साध्यवद्‌यत्किञ्चिद्‌व्यक्तिभिन्न-वृत्तौ नानाधिकरणकसाध्यके हेतावव्याप्तिर्मूलोक्ता साध्यवदन्यत्वस्य साध्यतावच्छेदकावच्छिन्नवद्भेदरूपत्वे तस्या अनवकाशात् स्वयं सिद्धान्तमतापेक्षया गौरवेण तन्निराकरोति, 'केवलान्वयित्वेति साध्य-इत्यादिः, 'अनुमित्यनुत्पत्तेरिति, साध्यसामानाधिकरण्यमात्रग्रहस्य व्यभिचारग्रहाविरोधित्वादिति भावः। 'तद्ग्रहोऽपि' साध्ये केवलान्व-यित्वग्रहोऽपि, हेतुर्व्वाच्यः। यद्यपि स्वमते अवृत्तिगगनादेः स्वाभावा-भावत्वविरहादत्यन्ताभावे वृत्तिमत्त्वमनिवेश्यैव तदभावसाधारण-केवलान्वयित्वं सुवचं तथापि साम्प्रदायिकानुमततद्‌घटितसामानाधि-करण्यशरीरे वृत्तौ साधनवन्मात्रस्य विशेषणत्वोपगमेनैव व्यापक-तापर्य्यवसानं भवति स्वमते च पुनरत्यन्ताभावांशे साधनवद्‌वृत्ति-त्वविशेषणप्रक्षेपेणैव इति साम्प्रदायिकानुमतमेव केवलान्वयित्वं दर्शयति, 'तच्चेति, 'वृत्तिमदत्यन्ताभावाप्रतियोगित्वादिकमिति आदिपदान्निष्कृष्टताद्दशाभावप्रतियोगितानवच्छेदकत्वपरिग्रहः। अथान्योन्याभावघटितव्यापकतापर्य्यवसानाय तद्‌घटितमपि केवला-न्वयित्वमाह, 'अन्योन्याभावेति, गगनादेरत्यन्ताभावप्रतियोगित्वानु-रोधेन तदभावत्वस्वीकारेऽपि तद्वदन्योन्याभावत्वमप्रामाणिकमित्य-न्योन्याभावे वृत्तिमत्त्वमव्यावर्त्तकतया नोपात्तं, 'सर्व्वसाधार-ण्याय' साध्यव्यतिरेकित्वग्रहकालीनानुमितिकारणीभूतज्ञानविष-यत्वनिर्व्वाहाय, 'लाघवात्' साध्यवदन्यावृत्तित्वज्ञानहेतुत्वान्तरा-कल्पनालाघवात्, 'साधनेति साधनवतोऽत्यन्ताभावविशेषणीभूता-यावृत्तेः, साधनवद्‌वृत्तितायाअन्योन्याभावस्य वा विशेषणत्वमुचितं,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथाचोच्यते इत्यादिवक्ष्यमाणसिद्धान्त एव पर्य्यवसानं अन्यथा कार्य्य-कारणभावद्वयकल्पनागौरवप्रसङ्गात् इत्यर्थः । 'शेषमिति, साध्ये केवलान्वयित्वग्रहदशायां तस्य पक्षे अननुमितावपि न क्षतिः । तदानीं केवलान्वयित्वेन हेतुना साध्य-पक्षवृत्तित्वानुमित्यैव पक्षे साध्यवत्तानिश्चयकार्य्यसम्भवात् । तथाच साध्यवदन्यावृत्तित्वमेवानुमित्यौपयिकं लघुशरीरत्वादित्यादिकमर्थः ।

इति श्रीमन्महामहोपाध्यायगदाधरभट्टाचार्य्यविरचिता
पूर्व्वपक्षस्य टिप्पनी समाप्ता ॥ * ॥

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्त्वचिन्तामणौ

व्याप्तिवादे सिद्धान्तलक्षणम् ।

अत्रोच्यते । प्रतियोग्यसमानाधिकरण-यत्समानाधिकरणात्यन्ताभावप्रतियोगितावच्छेदकावच्छिन्नं यन्न भवति तेन समं तस्य सामानाधिकरण्यं व्याप्तिः ।

सिद्धान्तलक्षणस्य दीधितिः ।

प्रतियोग्यसमानाधिकरणेति, प्रतियोग्यसमानाधिकरण-यद्रूपविशिष्टसमानाधिकरणात्यन्ताभावप्रतियोगितानवच्छेदको यो धर्म्मस्तद्धर्म्मावच्छिन्नेन येन केनापि समं सामानाधिकरण्यं तद्रूपविशिष्टस्य तद्धर्म्मावच्छिन्न-यावन्निरूपिता व्याप्तिरित्यर्थः ।

सिद्धान्तलक्षणस्य गादाधरी विवृतिः ।

'प्रतियोगितावच्छेदकावच्छिन्नं यन्न भवतीतियथाश्रुतमूलात् यत्पदार्थे साध्ये प्रतियोगितावच्छेदकावच्छिन्नान्यत्वं प्रतीयते तथाच वह्निमान् धूमादित्यादौ हेतुसमानाधिकरणमहानसीयवह्नित्वाद्य-वच्छिन्नाभावमादाय दोषो दुर्व्वारः, सर्व्वेषामेव वह्न्यादीनां तादृशाभावप्रतियोगितावच्छेदकविशिष्टतया (१) तदन्यत्वासम्भवात् । यत्पदस्य यद्रूपावच्छिन्नपरतया यद्रूपावच्छिन्नस्य (२) प्रतियोगि-

---

(१) तादृशाभावप्रतियोगितावच्छेदकावच्छिन्नतयेति पा० ।

(२) यद्रूपावच्छिन्नेत्यस्य अग्रिमेण तदवच्छिन्नान्यत्वमित्यनेन सम्बन्धः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तावच्छेदका ये ये धर्म्माः प्रत्येकं तदवच्छिन्नान्यत्वमित्यर्थे साध्यतावच्छेदकस्य तत्तत्प्रतियोगितावच्छेदकधर्म्मावच्छिन्नभेदकूटेन प्रत्येकं सामानाधिकरण्यपर्य्यवसिते वह्न्यादिसाध्यकहेतौ वह्नित्वादेर्विभिन्नवह्न्यादिव्यक्त्यन्तर्भावेन महानसीयवह्नित्वाद्यवच्छिन्नभेदैः प्रत्येकं सामानाधिकरण्यसत्त्वेऽप्येकव्यक्तिसत्तादिसाध्यके सत्तात्वादौ हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकविशिष्टसत्तात्वाद्यवच्छिन्नभेदसामानाधिकरन्यासत्त्वादव्याप्तिः । यद्रूपावच्छिन्नं प्रतियोगितावच्छेदकावच्छिन्नाविषयकप्रतीतिविषय इत्यर्थे उक्तदोषोद्धारेऽपि यद्रूपं प्रतियोगितावच्छेदकभिन्नं प्रतियोगितावच्छेदकाविषयकप्रतीतिविषयो वा (१) इत्यत एव सामञ्जस्ये प्रतियोगिताव-

---

(१) यद्रूपं हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकमित्यपेक्षया यद्रूपं हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकाविषयकप्रतीतिविषय इत्यर्थे लाघवमिति । अथ गुण-कर्म्मान्यत्वविशिष्टसत्तावान् द्रव्यत्वादित्यादौ हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकगुणत्वत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वं न गुणत्ववतकर्म्मत्ववदन्यत्वविशिष्टसत्तात्वस्य इत्यव्याप्तिसम्भवे गौरवप्रदर्शनमनुचितं, न च गुणत्वत्वेन गुणत्वं न भेदप्रतियोगितावच्छेदकं गौरवात् अतो गुणत्वभेदाप्रसिद्ध्या साध्याप्रसिद्धिः स्वरूपतो गुणत्वनिष्ठावच्छेदकताकभेदस्य साध्यघटकत्वे गुणत्वत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वं तादृशसाध्यतावच्छेदकस्य इति नाव्याप्तिरिति वाच्यम् । तथापि हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं यत् तदवच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वं न साध्यतावच्छेदकस्य इत्यव्याप्तितादवस्थ्यात् घटकालीनवह्निसाध्यकेऽव्याप्तेश्च तत्र तादृशघटत्वावच्छिन्नाविषयकप्रतीतिविषयतावच्छेदकत्वस्य घटकालीनवह्नित्वेऽसत्त्वादिति चेन्न, हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकावच्छिन्नमुख्यविशेष्यताशून्यप्रतीतिविशेष्यतावच्छेदकत्वस्य विवक्षितत्वात् । हेतुमन्निष्ठाभावप्रतियोगितावच्छेदकावच्छिन्नापर्य्याप्त-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विषयतावच्छेदकतापर्य्याप्त्यधिकरणत्वमिति कश्चित्। तादृशधर्म्मावच्छिन्नविशेष्यताभिन्नविशेष्यतावच्छेदकत्वमित्यपि कश्चित्।

अत्र प्रकृतानुमितिविधेयतावच्छेदकतापर्य्याप्त्यवच्छेदकधर्म्मावच्छेदेन हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वावच्छिन्नभेदविवक्षणेन महानसीयवह्न्यभावमादायाव्याप्तिवारणम् अवच्छेदकभेदेनावच्छेदकताभेदेऽपि तत्तत्प्रतियोगितानिरूपितावच्छेदकतात्वेन व्यासज्यवृत्तित्वेन तदवच्छिन्नभेदो वह्नित्वादावक्षत एव। अथ हेतुसमानाधिकरणाभावीयतत्तत्प्रतियोगितावच्छेदकत्वावच्छिन्नभेदकूटनिवेशे दुर्ज्ञेयत्वम्। न च हेतुसमानाधिकरणाभावीयप्रतियोगितावच्छेदकतात्वेनापि पर्य्याप्त्यन्तरं वर्त्तत एव इत्यनुगतरूपेणैव निवेशः कार्य्य इति वाच्यम्। तथा सति धूमवान् वह्नेरित्यादौ अतिव्याप्त्यापत्तेः यावन्तो वह्निसमानाधिकरणाभावप्रतियोगितावच्छेदकधर्म्मास्तावत्समुदायत्वस्यैव तदवच्छेदकतापर्य्याप्त्यवच्छेदकतया धूमत्वत्वावच्छेदेन वह्निमन्निष्ठाभावप्रतियोगितावच्छेदकत्ववद्भेदसत्त्वादिति चेन्न, अवच्छेदकम् अवच्छेदकत्ववत् इति प्रतीत्योर्वैलक्षण्येन स्वरूपसम्बन्धरूपपर्य्याप्तिसम्बन्धावगाहनस्यैव नियामकत्वं तथाच धूमत्वं वह्निमन्निष्ठाभावप्रतियोगितावच्छेदकमिति प्रतीतिबलादेव धूमत्वादावपि वह्निमन्निष्ठाभावप्रतियोगितावच्छेदकत्वपर्य्याप्तिस्वीकारेणातिव्याप्तिविरहात् वह्नित्वं धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकमिति प्रतीत्यभावेन च वह्नित्वत्वावच्छेदेन धूमसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वपर्य्याप्त्यभावान्नाव्याप्तिः, अतएव साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नहेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकत्वत्वावच्छिन्नावच्छेदकताकभेदो वह्नित्वे न वर्त्तत एवेत्यव्याप्तिरिति परास्तम्। वह्नित्वं समवायेन धूमसमनाधिकरणाभावप्रतियोगितावच्छेदकं नेति प्रतीत्यभावादेव तादृशभेदसत्त्वेनाव्याप्तिविरहात् एतेन साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्नावच्छेदकतानिरूपकप्रतियोगितानिरूपकतावच्छेदकत्वत्वेन निवेशोऽव्याप्तिवारणाय नोपादेयः हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकं यावत् स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकम् एतादृशं स्वं साध्यतावच्छेदकमित्यनवच्छेदकात्वपारिभाषिकबलात् दण्डिमानित्यादौ नैतादृशं स्वं किमपि दण्डस्वरूपं हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकयावद्दण्डस्य प्रत्येकं कस्यापि दण्डस्य स्वविशिष्टसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्वविरहादिति परम्परासम्बन्धानुधावनमिति भट्टाचार्य्येण वस्तुतस्त्वित्यादिना लिखितं न सम्यक् यत्र यादृशं साध्यतावच्छेदकं तत्र तादृश-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

च्छेदकविशिष्टाविषयकप्रतीतिविषयत्वस्य साध्यतावच्छेदकविशिष्टे निवेशनमनुचितं, एवं स्वरूपसम्बन्धरूपावच्छिन्नत्वविवक्षया यद्रूपावच्छिन्नं प्रतियोगित्वं उक्ताभावप्रतियोगितावच्छेदकानवच्छिन्नमित्यर्थः, शुद्धवह्नित्वादिरूपसाध्यतावच्छेदकावच्छिन्नप्रतियोगित्वे महानसीयत्वादिविशिष्टवह्नित्वाद्यनवच्छेद्यत्वं सुलभमेव यद्रूपावच्छिन्नं प्रतियोगित्वं तादृशप्रतियोगिताभिन्नमित्युक्तौ समवायादिना घटादौ साध्ये संयोगादिना घटादिहेतावतिव्याप्तिः संयोगादिसम्बन्धावच्छिन्नघटत्वाद्यवच्छिन्नप्रतियोगितायां हेतुमन्निष्ठाभावप्रतियोगिताभेदसत्त्वात् इदं वाच्यं ज्ञेयत्वादित्यादावव्याप्तिवारणाय हेतुमन्निष्ठाभावप्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य निवेशनीयतया व्यभिचारिमात्र एव सम्बन्धान्तरावच्छिन्नसाध्यतावच्छेदकावच्छिन्नप्रतियोगितायां साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताभेदसत्त्वेनातिव्याप्तिः स्यात् यद्रूपावच्छिन्नप्रतियोगितात्वावच्छेदेन हेतुमन्निष्ठसाध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताभेदनिवेशे च व्यापकत्वघटनया महागौरवमिति प्रतियोगिताभेदमुपेक्ष्य प्रतियोगितावच्छेदकावच्छिन्नभेदोपादानं, साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वं भेदानुयोगिसाध्यतावच्छेदकावच्छिन्नप्रतियोगितायां निवेश्यातिव्याप्तिवारणेऽपि केव-

---

मेव स्वपदेन धर्त्तव्यम् अन्यथा महानसीयत्वविशिष्टवह्नित्वस्य साध्यतावच्छेदकतास्थले व्यभिचारिण्यतिव्याप्तेः तथात्वापि दण्डत्वरूपेण दण्डस्य उपादानसम्भवेन सर्व्वस्यैव दण्डस्य दण्डत्वावच्छिन्नसम्बन्धिनिष्ठाभावप्रतियोगितावच्छेदकत्वसम्भवेनाव्याप्तेरयोग इत्यतो वस्तुतस्त्वित्यादिपाठः प्रामादिक इति वदन्ति इति कृतं पल्लवितेन ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

लान्वयिसाध्यके तादृशप्रतियोगित्वाप्रसिद्धा अव्याप्तिरितिरीत्या मिश्रव्याख्यापरिष्कारेऽपि स्वावलम्बनीयपक्षापेक्षया गौरवमित्यु-पाध्यायोपदिष्टनञ्व्यत्यासपक्षमवलम्ब्य व्याचष्टे, 'प्रतियोग्यस-मानाधिकरणेति। न च नञ्व्यत्यासेन साध्यतावच्छेदके प्रति-योगितावच्छेदकभेदनिवेशेऽपि शुद्धवह्नित्वादौ महानसीयत्वादि-विशिष्टवह्नित्वादिभेदासत्त्वात् साध्यतावच्छेदके प्रतियोगितावच्छे-दकाविषयकप्रतीतिविषयत्वमेव विवक्षणीयं तदपेक्षया साध्यताव-च्छेदकावच्छिन्नप्रतियोगित्वे प्रतियोगितावच्छेदकानवच्छेद्यत्व-निवेशपक्षे न गौरवमिति वाच्यम्। प्रत्येकं घटादौ घटपटो-भयत्वाद्यवच्छिन्नभेदवत् शुद्धवह्नित्वादौ महानसीयत्वाद्यन्तर्भावेन पर्य्याप्तविशिष्टवह्न्याद्यभावीयप्रतियोगितावच्छेदकत्वावच्छिन्नभेदस्य सुघटत्वात्। अवच्छेदकाविषयकप्रतीतिविषयत्वविवक्षामन्तरे-णैव प्रतीकारात्। अवच्छेदकत्वस्य वह्नित्व महानसीयत्वादि-निष्ठस्य सम्बन्धादिभेदेन भिन्नत्वेऽपि अनुगतेन तत्तत्प्रतियोगि-तावच्छेदकतात्वरूपेण व्यासज्यवृत्तितायाश्चक्रवर्त्तिलक्षणे वह्नि-त्वादेरवच्छेदकत्वपर्य्याप्त्यनधिकरणत्वमुपपादितवतो दीधितिकार-स्यानुमतत्वात्, सार्व्वभौमैस्तु विशेषधर्म्मावच्छिन्नप्रतियोगिता-कूटानतिरिक्तसामान्यधर्म्मावच्छिन्नप्रतियोगितासम्बन्धस्य विशेष-रूपेणाव्यासज्यवृत्तेरपि सामान्यधर्म्मावच्छिन्नप्रतियोगितासम्बन्धत्वे-नानुगतेन व्यासज्यवृत्तित्वमितिकण्ठरवेणैवोक्तम्। एवं सति महा-नसीयवह्निभिन्नवह्निमान् धूमादित्यादौ साध्यतावच्छेदकमहा-नसीयवह्निभिन्नत्व-वह्नित्वाद्योः प्रत्येकं धूमादिसमानाधिकरणा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भावप्रतियोगितावच्छेदकत्वपर्य्याप्त्यनधिकरणत्वेऽपि प्रकृतानुमितिविधेयतावच्छेदकता यादृशरूपावच्छिन्ने पर्य्याप्ता तादृशरूपावच्छिन्नानुयोगिताकतादृशावच्छेदकत्वावच्छिन्नभेदस्यैव व्याप्तिघटकत्वोपगमेन नातिप्रसङ्गः (१) उक्तस्थलीयानुमितिविधेयतावच्छेदकता-

---

ननु महानसीयवह्निभिन्नवह्निमान् धूमादित्यादौ अतिव्याप्तिवारणाय अनुमितिविधेयतावच्छेदकता यादृशरूपावच्छिन्ने पर्य्याप्ता तद्रूपावच्छिन्नानुयोगिताकतादृशाभावप्रतियोगितावच्छेदकत्वावच्छिन्नभेदविवक्षणेऽपि रूपवान् पृथिवीत्वादित्यादावव्याप्तिर्हेतुमन्निष्ठस्य विषयितया रूपत्वादिविशिष्टाभावस्य यत्प्रतियोगितावच्छेदकत्वं तदवच्छिन्नभेदस्य रूपत्वादावसत्त्वात् । न च साध्यतावच्छेदकताघटकसम्बन्धेन तादृशप्रतियोगितावच्छेदकत्वस्य विवक्षणान्नैषदोष इति वाच्यम् । तथा सति पर्य्याप्तिनिवेशेऽपि साध्यतावच्छेदकताघटकसमवायाद्यवच्छिन्नाया हेतुमन्निष्ठमहानसीयवह्न्यभावप्रतियोगितावच्छेदकताया व्यासज्यवृत्तित्वविरहेण वह्नित्वादौ तदवच्छिन्नभेदासत्त्वाद्वह्निमान् धूमादित्यादावव्याप्तिवारणासम्भवादिति चेन्न, साध्यतावच्छेदकताघटकसम्बन्धावच्छिन्ना या हेतुमन्निष्ठाभावीयप्रतियोगितावच्छेदकता तन्निरूपकीभूता या प्रतियोगिता तदवच्छेदकत्वावच्छिन्नभेदस्य निवेशनीयत्वात् तथाच रूपवान् पृथिवीत्वादित्यादौ विषयित्वावच्छिन्नरूपत्वनिष्ठावच्छेदकताया लक्षणाघटकत्वान्नाव्याप्तिः न वा वह्निमान् धूमादित्यादौ तादृशसम्बन्धावच्छिन्नतादृशावच्छेदकतानिरूपकप्रतियोगितावच्छेदकत्वस्य व्यासज्यवृत्तित्वसत्त्वेन तदवच्छिन्नभेदस्य वह्नित्वादौ सत्त्वादव्याप्तिरपोति ध्येयम् । न चैवमनुमितिविधेयतावच्छेदकतापर्य्याप्त्यवच्छेदकीभूतदण्डत्वाद्यवच्छेदेन दण्डादेर्हेतुमन्निष्ठाभावीयतादृशप्रतियोगितावच्छेदकतानिरूपकप्रतियोगितावच्छेदकतावच्छेदसत्त्वाद्दण्डत्वादिसाध्यकेऽव्याप्तिदानासङ्गतिरिति वाच्यम् । हेतुमन्निष्ठाभावीयतादृशप्रतियोगितावच्छेदकताया व्याप्यवृत्तितया दण्डत्वावच्छेदेन तदवच्छिन्नभेदसत्त्वाभावात् । न च यो यदनवच्छेदकः स तदभावावच्छेदक इति नियमबलादेव दण्डत्वावच्छेदेन तादृशावच्छेदकत्ववद्भेदसत्त्वान्नाव्याप्तिरिति वाच्यम् । तादृशनियमस्याप्रामाणिकत्वात् द्रव्यत्वावच्छेदेन दण्डे घटजनकत्वाभावसत्त्वप्रसङ्गादिति । इदमत्रावधेयं तत्तद्दण्डाभावप्रतियोगितावच्छेदकतात्वरूपेण

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पर्य्याप्त्यवच्छेदकदर्शितधर्म्मद्वयनिष्ठद्वित्वाद्यवच्छिन्नहेतुमन्निष्ठाभाव-प्रतियोगितावच्छेदकत्वपर्य्याप्तिमति विरोधेन तदवच्छिन्नभेदा-सत्त्वात्, साध्यतावच्छेदकवृत्तिमहानसीयवह्निभिन्नत्व-वह्नित्वो-भयत्वाद्यनुपस्थितिकाले तदवच्छिन्नेऽनवच्छेदकत्वस्य दुर्ग्रहतया अनुमित्यनुत्पादो व्यापकताज्ञानकारणतावादिनामिष्ट एव, तेन तेन रूपेणानवच्छेदकत्वग्रहात्तद्रूपावच्छिन्नविधेयतावच्छेदकताका-नुमित्यनुपपत्तिश्च केवलान्वयिग्रन्थे ग्रन्थकृतैव वक्ष्यते, यत्त्व-तत्त्वेन हेतोर्निवेशे हेतुव्यक्तिभेदेन व्याप्तिर्भिद्येत, सा च नानुमित्युप-योगिनी पक्षीयधूमादिव्यक्तिव्यापकतायाः पूर्व्वं वह्न्यादावगृहीत-त्वादिति 'यद्रूपविशिष्टेत्युक्तं, तथाच धूमत्वादिरूपहेतुतावच्छेदक-धर्म्मानेव विशिष्य निवेश्य तत्तद्रूपावच्छिन्नहेतुकानुमित्यौपयिक-व्याप्तिर्निर्वाह्या महानसादौ धूम-वह्न्यादिव्यभिचाराग्रहाद्वह्नित्वा-दिना तत्तद्धूमत्वाद्यवच्छिन्ननिरूपिताया भाव पक्षीयधूमादिसाधा-रणधूमत्वाद्यवच्छिन्ननिरूपिताया अपि व्यापकताया ग्रहसम्भवा-त्तदघटितव्याप्तेः पक्षधर्म्मधूमे ग्रहादनुमितिनिर्व्वाह इति भावः। न च सामानाधिकरण्यस्य व्याप्तित्वपक्षे हेतुव्यक्तिभेदेन व्याप्तिभेद-आवश्यक एवेत्यनुगतरूपेण हेतुनिवेशो व्यर्थ इति वाच्यम्। हेतुव्यक्तिभेदेन व्याप्तिभेदेऽपि अनुगतरूपेण हेतुनिवेशे धूमव्यापक-

---

तादृशावच्छेदकताया व्यासज्यवृत्तितास्युपगमस्य अवच्छेदकतापर्य्याप्तिनिवेशेऽपि न तादृशावच्छेदकत्वावच्छिन्नानुगताभावनिवेशननिर्व्वाहः हेतुसमानाधिकरणा-भावप्रतियोगितावच्छेदकतात्वस्वरूपेण तथात्वस्तुपगमस्य अनुगताभावनिवेशसम्भवेऽपि धूमवान् वह्नेरित्यादौ धूमत्वत्वाद्यवच्छेदेन तादृशावच्छेदकत्वावच्छिन्नभेदसत्त्वादति-प्रसङ्गादिति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वह्निप्रतियोगिकधूमनिष्ठसामानाधिकरण्यव्यक्तीनामननुगमात् सामान्यप्रत्यासत्त्या पक्षीयहेतुनिष्ठव्याप्तेरपि प्रथमं अनुगतसामानाधिकरण्यत्वरूपव्याप्तित्वेन ग्रहसम्भवेनानुमित्युपपत्तेः तत्तद्व्यक्तित्वेन हेतुनिवेशेऽननुगमात् सामान्यप्रत्यासत्त्यापि पक्षीयहेतुनिष्ठव्याप्तेर्व्याप्तित्वेन दुर्ग्रहतया अनुमित्यनुपपत्तेः, हेतुतावच्छेदकाश्रयाधिकरणत्वमुपेक्ष्य तद्विशिष्टनिरूपिताधिकरणत्वप्रवेशप्रयोजनमग्रे वक्ष्यते प्रतियोगितानवच्छेदकत्वमात्रेण साध्यतावच्छेदकनिवेशे वह्नित्वत्वादिना वह्नित्वादिकमनवगाहमानात् प्रतियोगितानवच्छेदकवत्समानाधिकरणधूमवानित्यादिज्ञानाद्वह्निमानित्याद्यनुमित्यापत्तिः स्यात् । न चेष्टापत्तिसम्भवः, कदाचिद्वह्नित्वेन कदाचिद्द्रव्यत्वादिना वह्न्यनुमितिरिति नियमानुपपत्तेः । न चानवच्छेदकत्वेन तत्तद्धर्म्मावगाहित्वमेव व्याप्तिग्रहस्यानुमितौ विधेयतावच्छेदकतया तत्तद्धर्म्मभाननियामकमिति वाच्यम् । अनवच्छेदकत्वेन वह्नित्वादिभाने द्रव्यत्वादिभानस्यापि प्रायशः सम्भवात् एवं तत्तत्साध्यतावच्छेदकावच्छिन्नव्यभिचारितया हेतुभानस्य हेतुसमानाधिकरणाभावप्रतियोगितानवच्छेदकत्वमात्रेण तत्तत्साध्यतावच्छेदकावगाहिव्याप्तिज्ञानाविरोधितया विशिष्य साध्यतावच्छेदकानवगाहिव्याप्तिज्ञानस्य हेतुत्वे व्यभिचारस्य हेत्वाभासतानुपपत्तिश्चेति विशिष्य साध्यतावच्छेदकस्य व्याप्तिघटकतालाभाय प्रतियोगितानवच्छेदकावच्छिन्नेनेत्यनुक्त्वा प्रतियोगितानवच्छेदको यो धर्म्मस्तदवच्छिन्नेनेत्युक्तम् । यत्र वह्नित्वत्वादिविशेषणावच्छिन्नस्य साध्यतावच्छेदकता तत्र तेन रूपेणैव तद्व-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

र्म्माणां व्याप्तिघटकता यत्र च स्वरूपत एव वह्नित्वाद्यखण्ड-धर्म्माणां साध्यतावच्छेदकत्वं तत्रापि विशेषणावच्छिन्नतत्तद्धर्म्म-घटिततत्तद्धर्म्मवदितरावृत्तित्वरूपवह्नित्वत्वादिना तन्निवेशो न तु स्वरूपत एव, अनवच्छेदकत्वरूपविशेषणपुरस्कारेण भाने निर्व्विशे-षणकभानात्मकस्य स्वरूपतो भानस्यासम्भवात् वह्न्यादीतरावृत्ति-त्वस्य वह्न्यादिमात्रवृत्तिधर्म्मान्तरसाधारण्येऽपि तन्मात्रपुरस्कारेण व्यापकतावच्छेदकत्वग्रहस्यापि वह्नित्वाद्यवच्छिन्नविधेयकानुमिति-हेतुत्वमुपेयते सकलवह्न्यादिवृत्तित्वविषयतानिवेशे गौरवात् सकलवह्न्यादिवृत्तित्वस्य वह्न्यादीतरवृत्तिसाधारणतया तन्मात्र-पुरस्कारेण व्यापकतावच्छेदकत्वग्रहस्य न हेतुतासम्भवः तथा सति इन्धनादिहेतुनापि वह्नित्वाद्यवच्छिन्नानुमितिप्रसङ्गात् सकल-वह्न्यादिवृत्तिद्रव्यत्वादाविन्धनादिव्यापकतावच्छेदकत्वसत्त्वाद्वह्नि-त्वादिनिष्ठतद्व्यक्तित्व--धूमजनकतावच्छेदकजातित्वादेर्वह्नित्वादि--मात्रवृत्तित्वेऽपि तेन रूपेण व्यापकतावच्छेदकत्वग्रहाद्वह्निमानित्य-नुमितिरनुभवविरुद्धा येन रूपेणोपस्थिते वह्न्यादीतरसाधारण्य-संशयो न जायते तत्पुरस्कारेण व्यापकतावच्छेदकत्वग्रहादेवोक्ता-नुमित्युत्पादानुभवात् अतएव ज्ञानत्वत्वानुभवत्वव्यापकगुणत्व-व्याप्यजातित्वयोरविशेषेण (१) ज्ञानत्वत्वरूपेण व्यापकतावच्छेदक-त्वग्रहाज्ज्ञानवानयमित्यनुमितिर्न भवितुमर्हतीति दीधितिकार-वक्ष्यमाणदूषणं प्रत्युक्तम्, अधिकमग्रे वक्ष्यामः। तत्तद्व्यक्तिसामाना-धिकरण्यं न तत्तद्व्यक्तिगमकताप्रयोजकं पर्व्वतीयधूमे महानसीय-

(१) अत्राविशेषत्वं तन्मात्रवृत्तितया।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वह्निसामानाधिकरण्याग्रहेऽपि ततः पर्व्वते लाघवज्ञानादिवशा-न्महानसीयवह्न्यनुमितिरिति दर्शयति, 'येन केनापीति 'यावन्निरू-पितेत्याभ्यां, 'तद्रूपविशिष्टस्य तद्धर्म्मावच्छिन्नयावन्निरूपिता व्याप्ति-रिति तद्रूपावच्छिन्ननिष्ठा तद्रूपावच्छिन्नयावद्व्यक्तिगमकताप्रयो-जिका व्याप्तिरित्यर्थः, यथाश्रुते एकसाध्यव्यक्तिसामानाधिकरण्य-स्यापरव्यक्तिप्रतियोगिकत्वासम्भवेनासङ्गतेः ।

अनुमानदीधितिः ।

दण्डादौ साध्ये परम्परासम्बद्धं दण्डत्वादिकमेव साध्यतावच्छेदकमतो नाव्याप्तिः ।

गादाधरी विवृतिः ।

यत्रैकैकसाध्यतावच्छेदकव्यक्तिर्न सकलहेतुमद्वृत्तितावच्छे-दिका तत्रानुगतरूपावच्छिन्नेनापि तेन रूपेण न तादृशहेतु-व्यापकतासम्भवः सकलसाध्यतावच्छेदकव्यक्तीनामेव चालनी-न्यायेन हेतुसमानाधिकरणतत्तद्व्यक्त्यवच्छिन्नाभावप्रतियोगिता-वच्छेदकत्वादित्याशङ्कामिष्टापत्त्या परिहरति, 'दण्डादाविति, 'परम्परासम्बद्धमिति स्वसमवायिसंयोगादिसम्बन्धेन साध्यसम्बद्ध-मित्यर्थः, एतच्च साध्यावृत्तितया दण्डत्वादेर्न व्यापकतावच्छेदकत्व-सम्भव इत्याशङ्कानिराकरणाय, 'साध्यतावच्छेदकं' दण्डिसंयोगत्वा-दिरूपनानाधिकरणवृत्तितावच्छेदकावच्छिन्नहेतुव्यापकतावच्छेद-कमित्यर्थः (१) । एवकारेण दण्डादिरूपसखण्डधर्म्मव्यवच्छेदः,

(१) दण्डिसंयोगादिरूपनानाधिकरणवृत्तितावच्छेदकावच्छिन्नहेतुव्यापकता-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तथाच तत्र प्रतियोगितानवच्छेदकत्वस्य दुरुपपादत्वेऽपि न क्षतिः। दण्डत्वादिनैव प्रकारेण तद्धेतुकदण्डाद्यनुमितेरुपगन्तव्यत्वात्। व्यापकतावच्छेदकत्वभ्रमादेव दण्डादिप्रकारकदण्डानुमितेरुपगमात्। स्वाश्रयघटितपरम्परासम्बन्धेन यद्धर्म्मे व्यापकतावच्छेदकत्वग्रहस्तद्विशिष्टधर्म्मिप्रकारेण सामानाधिकरण्यप्रतियोगितया साध्यावगाहिव्याप्तिग्रहस्यैव वा तद्धर्म्मविशिष्टदण्डादिरूपधर्म्मिणोऽनुमितिविधेयतावच्छेदकताप्रयोजकत्वोपगमेन दण्डिमानित्याकारकानुमितेर्भ्रमशून्यतादशायां निर्व्वाह्यत्वादिति भावः। अथ महानसीयत्वादिसहितवह्नित्वादेर्धूमादिमन्निष्ठाभावप्रतियोगितावच्छेदकत्वेऽपि शुद्धवह्नित्वादिरूपसाध्यतावच्छेदकस्य तादृशप्रतियोगितानवच्छेदकत्ववत्, तत्ताविशिष्टदण्डस्य तादृशप्रतियोगितावच्छेदकत्वेऽपि दण्डत्वाद्यवच्छिन्नस्य तादृशप्रतियोगितानवच्छेदकत्वस्य सुघटतया तस्य व्यापकतावच्छेदकत्वानुपगमो न सङ्गच्छते। न च तद्दण्डो नास्तीति बुद्धौ तत्तोपलक्षित एव दण्डे प्रतियोगितावच्छेदकत्वपर्य्याप्तिर्भासते न तु तत्तामन्तर्भाव्य तत्तोपलक्षितव्यक्तेरेवानतिप्रसक्ततया तत्तांशस्यावच्छेदकान्तर्भावे गौरवादतो-विशेष्यस्यावच्छेदकत्वपर्य्याप्त्यधिकरणतया दण्डत्वविशिष्टस्यापि तस्यानवच्छेदकत्वं दुर्घटं(१) महानसीयवह्न्याद्यभावप्रतियोगितायां वह्नित्वादेरतिप्रसक्ततया तन्मात्रेऽवच्छेदकतापर्य्याप्त्यसम्भवेन महा-

---

वच्छेदकमित्यर्थ इति पा०। एतादृशपाठे दण्डिसंयोगादिरूपेत्यस्य उत्तरवर्त्तिनि हेतुव्यापकतावच्छेदकमित्यत्र हेतावन्वयः।

(१) विशेष्यवृत्तेर्विशिष्टानुयोगिकाभावानभ्युपगमादिति भावः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नसीयत्वादेरवच्छेदकान्तर्भाव आवश्यक इति शुद्धवह्नित्वादेस्तादृश-प्रतियोगितानवच्छेदकत्वं सुघटमिति वाच्यम् । स्वरूपतो भासमानस्यैव स्वरूपतोऽवच्छेदकतायाः सिद्धान्तसिद्धतया सखण्ड-पदार्थस्य दण्डादेः स्वरूपतोऽभानात्तस्य स्वरूपतोऽवच्छेदकत्वासम्भवेन दण्डत्वादिविशिष्टस्य चातिप्रसक्तत्वेन तत्तादिरूपविशेषण-मनन्तर्भाव्य तत्रावच्छेदकत्वपर्य्याप्तेरयोगात् । अभावप्रतियोगितावच्छेदकतया भासमाने उपलक्षणीभूतधर्म्मान्तरभानोपगमे उपलक्षणतया दण्डत्वमात्रं तत्तद्दण्डावच्छिन्नाभावप्रतियोगितावच्छेदकतया भासमानतत्तद्दण्डांशे विषयीकृत्य दण्डिमति दण्डी-नास्तीति प्रत्ययस्य दुर्व्वारत्वाच्च । अत्र केचित् उक्तानुशयेनैव 'दण्डा-दावित्यादिपदद्वयोपादानं तेन च (१) पृथिवीत्वव्याप्यजातित्वा-दिना अनुगतीकृत्य घटत्व-पटत्व-मृत्तिकात्व-पाषाणत्वादिमतः सम-वायादिना पृथिव्यादिहेतुकसाध्यस्य तादृशजातित्वादेश्च परिग्रहः । समवायादिना हेतुभूतपृथिव्यादिमति तन्तु-कपालादौ विशेषणा-नवच्छिन्न-घटत्व-पटत्वाद्यवच्छिन्नाभावस्य सत्त्वात् । सर्व्वास्वेव साध्यतावच्छेदकतादृशजातिषु तथाविधाभावप्रतियोगितावच्छेद-कत्वपर्य्याप्तेस्तासां व्यापकतावच्छेदकत्वासम्भवेन तदनुगमकोक्त-धर्म्मस्यैव परम्परासम्बन्धेन तथात्वोपगमस्यावश्यकत्वादित्याहुः ।

अन्ये तु तद्दण्डवान्नास्तीत्यादौ प्रतियोगिविशेषणतया भासमान-दण्डादिष्वेव प्रतियोगितावच्छेदकत्वपर्य्याप्तिर्भासते तद्विशेषण-तत्तादौ तत्तदवच्छेदकतावच्छेदकत्वमेव प्रतियोगिताव्यधिकरणस्य

(१) आदिपदाभ्याञ्चेति पा० ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तदवच्छेदकत्वासम्भवेन तदन्तर्भावेन तदवच्छेदकतापर्य्याप्त्यसम्भवात्। न चानवच्छिन्नावच्छेदकत्वरूपं स्वरूपतोऽवच्छेदकत्वं निवेशनीयमिति वाच्यम्। तत्तत्सखण्डसाध्यतावच्छेदककव्यभिचारिण्यतिव्याप्तेः(१)। अतो तदण्डादेरनवच्छेदकत्वं दुर्घटं(२) महानसीयवह्निर्नास्तीत्यादौ च महानसीयत्वादेः प्रतियोगिन्येव विशेषणतया भानात् तदन्तर्भावेनैव प्रतियोगितावच्छेदकत्वपर्य्याप्तिर्भासत इति विशेषः। अथ वह्नित्वाद्यंश एव सामानाधिकरण्यसम्बन्धेन विशेषणतया महानसीयत्वादिकमवगाहमाना महानसीयत्वविशिष्टवह्नित्ववान्नास्तीत्याकारिका प्रतीतिः तस्या उक्तयुक्त्या (३) वह्नित्वादेरेव प्रतियोगितावच्छेदकत्वपर्य्याप्तिविषयकतया वह्नित्वादेरप्यनवच्छेदकत्वं दुर्घटमेव स्यात्, यदि च सामानाधिकरण्यसम्बन्धेन महानसीयत्वादेस्तदवच्छेदकतायामवच्छेदकत्वे गौरवान्महानसीयत्वादिसहितस्य वह्नित्वादेः प्रतियोगितावच्छेदकत्वं उक्तप्रतीतिस्तु कम्बुग्रीवादिमान्नास्तीति प्रतीतिवदवच्छेदकतावच्छेदकत्वांशे भ्रमरूपैवेत्युच्यते (४)। तदा यत्र सामानाधिकरण्यसम्बन्धेन महानसीयत्वादिविशिष्टस्य वह्नित्वादेः साध्य-

---

(१) तथाच दण्डादिसाध्यकव्यभिचारिण्यतिप्रसक्तिभयेनानवच्छिन्नावच्छेदकत्वनिवेशायोग इति भावः।

(२) अनवच्छिन्नावच्छेदकत्वमेव च स्वरूपतोऽवच्छेदकत्वं तत्सखण्डे नास्त्येव अतो दण्डादेरनवच्छेदकत्वं दुर्घटमिति पा०।

(३) प्रतियोगिताव्यधिकरणस्य प्रतियोगितावच्छेदकत्वासम्भवयुक्त्या।

(४) कम्बुग्रीवादिमान्नास्तीतिप्रतीतिर्यथा प्रतियोगितावच्छेदकत्वांशे भ्रमरूपा तथेत्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तावच्छेदकता तत्स्थलीये व्यभिचारिणि धूमादिहेतावति-
व्याप्तिरिति स्वविशिष्टसम्बन्धिनिष्ठेत्यादिना निर्व्वाच्यम् पारि-
भाषिकमेवावच्छेदकत्वं निवेशनीयं तच्च तल्लक्षणे यादृशस्य
स्वपदार्थस्य प्रवेशस्तादृशत्वं, एवञ्च महानसीयत्वादिविशिष्टस्य
वह्नित्वादेस्तत्र स्वपदेनोपादानसम्भवात् विशिष्टवह्नित्वत्वादिक-
मेव पारिभाषिकमवच्छेदकत्वं तदवच्छिन्नभेदश्च शुद्धवह्नित्वादावपि
दुर्घटः, तथाचावच्छेदकं यादृशं स्वं तादृशविशिष्टाविषयकप्रतीति-
विषयत्वमेवानवच्छेदकत्वपदेन विवक्षणीयं तथाच सति सखण्डस्य
दण्डादेः स्वरूपतोऽभानात्तत्तादिविशेषणविशिष्टस्यैवावच्छेदक-
लक्षणस्थस्वपदेनोपादेयतया तद्विशिष्टाविषयकप्रतीतिविषयत्वस्य
दण्डत्वादिविशिष्टे सुघटत्वात् व्यापकतावच्छेदकत्वमव्याहतमेवेति
चेन्न, पारिभाषिकस्यावच्छेदकत्वस्य स्वत्वघटितत्वेनाननुगतस्या-
भावकूटज्ञानासम्भवेन प्रतियोगितायाः स्वरूपसम्बन्धरूपावच्छेद-
कत्वस्यागत्या गुरुधर्म्मसाधारण्यमुरीकृत्य व्याप्तिलक्षणे तदेव हि
निवेशनीयम्, एवञ्च (१) सामानाधिकरण्यसम्बन्धेन महानसीय-
त्वादिविशेषणावच्छिन्नस्य वह्नित्वादेर्हेतुमन्निष्ठाभावप्रतियोगिता-
वच्छेदकत्वेऽपि (२) महानसीयत्वादिविशिष्टनिरूपितसमवायादेरेव-
प्रतियोगितावच्छेदकताघटकसम्बन्धत्वं तत्रोपियं शुद्धसमवायादिना

---

(१) गुरुधर्म्मस्याभावप्रतियोगितावच्छेदकत्वे चेत्यर्थः।

(२) सामानाधिकरण्यसम्बन्धेन महानसीयत्वादिविशिष्टवह्नित्वावच्छिन्न-
वक्नयादिसाध्यकव्यभिचारिण्यतिव्याप्तिवारणाय उक्तविशिष्टस्य प्रतियोगिताव-
च्छेदकत्वमवश्यमङ्गीकर्त्तव्यमिति भावः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वह्नित्वादेरतिप्रसक्तत्वात्, शुद्धसमवायादेस्तत्तावच्छेदकतावच्छेदकत्वे महानसीयत्वादिसामानाधिकरण्योपलक्षितवह्नित्वाद्यवच्छिन्नाभावात् तद्विशिष्टवह्नित्वाद्यवच्छिन्नाभावस्य वैलक्षण्यानुपपत्तेश्च। तथाच साध्यतावच्छेदकताघटकशुद्धसमवायादिना अखण्डवह्नित्वादेरनवच्छेदकत्वं न दुर्लभं (१)। न च महानसीयत्वादिसामानाधिकरण्यस्य यत्रोपलक्षणता तत्र तस्यावच्छेदककोटौ न प्रवेशः यत्र विशेषणत्वं तत्र प्रवेशः, इत्यत एव वैलक्षण्यमिति वाच्यम्। उपलक्षणीभवत्तत्तद्रूपावच्छिन्नप्रतियोगितावच्छेदकताकाभावबुद्धावपि तत्तद्रूपस्य प्रतियोगितावच्छेदकांशे प्रकारतया भानात् तत्रावच्छेदकतावच्छेदकत्वभानस्यावश्यकतया अवच्छेदकशरीराप्रवेशरूपोपलक्षणताया उपलक्षणविधया अवच्छेदके तत्रासम्भवात्। यदुपलक्षितनिरूपितसमवायादेरवच्छेदकताघटकसम्बन्धत्वं तस्योपलक्षणतयावच्छेदकत्वं यद्विशिष्टनिरूपितसमवायादेरवच्छेदकतावच्छेदकत्वं तस्य विशेषणविधया अवच्छेदकतावच्छेदकत्वमित्यस्यैव विशेषत्वात्। एकत्वप्रागभावविशिष्टघटादेः (२) संयोगादिसम्बन्धेनाभावस्य प्रतियोगितायां अप्रसिद्धतया (३) विशिष्टनिरूपितसंयोगादेरवच्छेदकत्वासम्भवेनागत्या विशेषणविधया प्रति-

---

(१) साध्यतावच्छेदकताघटकसंसर्गावच्छिन्नावच्छेदकत्वाभावस्य लक्षणघटकत्वादिति भावः।

(२) नन्वेवं विशिष्टसत्तावान् जातेरित्यादौ प्रतियोगितावच्छेदकावच्छिन्नव्यावृत्तिर्दीधितिकृतो विरुध्येत तत्र प्रतियोगितावच्छेदकीभूतविशिष्टनिरूपितसमवायेन प्रतियोगिनो गुणादावनधिकरणत्वादित्यत आह, एकत्वेत्यादि।

(३) प्रतियोगिताया व्यावर्त्तकतयेति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

योगितावच्छेदकत्वमित्यन्यथैव वैलक्षण्यस्य (१) उपपादनीयतया शुद्धसमवायादेरेव विशिष्टसत्ताद्यभावप्रतियोगितावच्छेदकसम्बन्धतया तादृशाभावस्य तादृशसम्बन्धेन प्रतियोगिसमानाधिकरणतया दीधितिकृतां प्रतियोगितावच्छेदकविशिष्टासामानाधिकरण्यपर्य्यन्तव्यावृत्तिसङ्गतिः। मा भूद्वा विशिष्टनिरूपितसमवायात्वादिना प्रतियोगितावच्छेदकतावच्छेदकसम्बन्धता तथापि महानसीयत्वादिसामानाधिकरण्योपलक्षितवह्नित्वादेस्तद्विशिष्टवह्नित्वादेश्च प्रतियोगितावच्छेदकतयोर्वैलक्षण्यं, आद्या तद्धर्म्मावच्छिन्नविशेष्यपर्य्याप्ता, अन्त्या च विशेष्य-विशेषणभावापन्नयोर्धर्म्म-धर्म्मिणोर्द्वयोः पर्य्याप्तेत्येवं रीत्यैवोपपादनीयं, तावतापि अखण्डस्य शुद्धवह्नित्वादेर्हेतुमन्निष्ठाभावप्रतियोगितानवच्छेदकत्वमुपपद्यते धर्म्मान्तरोपलक्षितवह्नित्वाद्यवच्छिन्नाभावस्य धूमादिमत्यवृत्तेः विशिष्टवह्नित्वाद्यवच्छिन्नाभावप्रतियोगितावच्छेदकतायाश्च विशेष्य-विशेषणान्तर्भावेनैव पर्य्याप्तेः। तत्तोपलक्षितदण्डावच्छिन्नप्रतियोगिताकहेतुमन्निष्ठाभावप्रतियोगितावच्छेदकता च तत्तावच्छिन्नशुद्धविशेष्य एव पर्य्याप्ता साध्यतावच्छेदकताघटकशुद्धसंयोगसम्बन्धावच्छिन्ना चेति तादृशसम्बन्धेन दण्डादेस्तादृशाभावप्रतियोगितानवच्छेदकत्वं दुरुपपादमिति सामञ्जस्यमिति वदन्ति।

वस्तुतो गुरुधर्म्मस्य प्रतियोगितानवच्छेदकत्वे पारिभाषिका-

(१) अगत्या विशिष्टाभावप्रतियोगिता विशेषणान्तर्भावेन पर्य्याप्ता उपलक्षिताभावप्रतियोगिता उपलक्षिते विशेष्य एव इत्येवं वैलक्षण्यस्य।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वच्छेदकत्वं निवेशनीयं तच्छरीरे यादृशं स्वं निविष्टं तादृशधर्म्म-भेदनिवेशे वह्नित्वादौ विशिष्टवह्नित्वादिभेदासत्त्वेन तादृश-तादृशधर्म्माविषयकप्रतीतिविषयत्वं निवेशनीयमिति गौरव-मतः प्रतियोगितावच्छेदकं यादृशयादृशरूपं स्वविशिष्टसम्बन्धि-निष्ठाभावप्रतियोगितानवच्छेदकतत्कत्वरूपं तत्तदतिरिक्तवृत्तित्व-मेवानवच्छेदकान्तेन विवक्षणीयं तथाच सर्व्वासामेव दण्डादिव्य-क्तीनां हेतुसमानाधिकरणाभावप्रतियोगितावच्छेदकतया कस्या-श्चिदपि दण्डादिव्यक्तेर्न यावत्प्रतियोगितावच्छेदकातिरिक्तवृत्तित्वं स्वस्य स्वातिरिक्तवृत्तित्वविरहात् इत्यखण्डधर्म्मस्य व्यापक-तावच्छेदकत्वानुसरणम् (१)। एतच्चैकोक्त्यभिप्रायेण यथाश्रुतमूल-लक्षणमुपपादयितुं सार्व्वभौमप्रभृतिमतमनुसृत्य। एकोक्त्यनादरे तु अनुगतरूपेण नानाव्यक्तिविधेयतावच्छेदककानुमित्यौपयिका-व्याप्तिर्यद्रूपावच्छिन्नमनवच्छेदकं यद्रूपं वा प्रतियोगितावच्छेद-कतानवच्छेदकं तद्रूपविशिष्टावच्छिन्नसामानाधिकरण्यं तद्रूप-विशिष्टावच्छिन्ननिरूपिता व्याप्तिरित्येवं रीत्या निर्व्वचनीया, तथा सति दण्डिसंयोगादिहेतुकापि दण्डिमानयमित्याकारि-कानुमितिर्विशेषदर्शिनामपि निर्व्वहति, एवमेकोक्त्या प्रति-योगिताधर्म्मिकोभयाभावघटिताया ग्रन्थकारेण स्वयमुपदर्श-नीयाया व्याप्तेरपि दण्डत्वादिविशिष्टदण्डाद्यवच्छिन्ननिरूपितत्व-निर्व्वाहः, हेतुसमानाधिकरणविशेषाभावप्रतियोगितायां दण्डत्व-पृथिवीत्वव्याप्यजातित्वादिविशिष्टावच्छेद्यत्वाभावस्याव्याहतत्वात्

(१) प्रतियोगितानवच्छेदकत्वानुसरणमिति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

दण्डादिसामान्याभावप्रतियोगितायामेव तद्धर्म्मविशिष्टनिरूपित-विलक्षणावच्छेद्यतासत्त्वादिति ध्येयम् ।

अनुमानदीधितिः ।

इत्थञ्च इदन्द्रव्यं गुण-कर्म्मान्यत्वे सति सत्त्वादित्यादौ सत्त्वाद्यधिकरणगुणादिनिष्ठात्यन्ताभावप्रतियोगित्वेऽपि द्रव्यत्वादेः नाव्याप्तिः साधनस्य विशिष्टसत्त्वादेर्गुणादावव्रत्तेः, सामानाधिकरण्यव्यक्तीनां भेदेऽपि निरूपकतावच्छेदकस्याधिकरणतावच्छेदकस्य चैक्याद्व्याप्तेरैक्यं, वस्तुतस्तु धूमत्वादिविशिष्टव्यापकवह्निसामानाधिकरण्यस्य रासभादिसाधारणत्वाद्धूमत्वादिमति तादृशसामानाधिकरण्यं तद्वति धूमत्वादिकं वा व्याप्तिः, आद्या भिन्ना द्वितीया त्वभिन्नैवेति ध्येयम् । अयं कपिसंयोगी एतद्वृक्षत्वादित्यादिसंग्रहायासमानाधिकरणान्तम् ।

गादाधरी विवृतिः ।

'इत्थञ्चेति हेतुतावच्छेदकोपलक्षितहेतुसामानाधिकरण्यसाधारणरूपमुपेक्ष्य विशिष्टसामानाधिकरण्यत्वेन सामानाधिकरण्यविशेषनिवेशनेन चेत्यर्थः, 'नाव्याप्तिरिति न विशिष्टसत्तात्वरूपहेतुतावच्छेदकविशिष्टवैशिष्ट्यावगाहिज्ञानजन्यानुमि–

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

त्यौपयिकव्याप्त्यनिर्व्वाह इत्यर्थः, तेन विशिष्टसत्तात्वाद्युपलक्षित-हेतुसत्ताज्ञानजन्यानुमित्यौपयिकव्याप्तौ तु तदुपलक्षितहेतु-सामानाधिकरण्यमेव निवेश्यं, अतो द्रव्यत्वाद्यभावे तादृश-हेतुसामानाधिकरण्यसत्त्वात् तादृशहेतौ न द्रव्यत्वादेर्व्याप्तिरित्य-भ्रान्तस्यापि गुणादौ विशिष्टसत्तात्वाद्युपलक्षितहेतुसत्ताज्ञान-सम्भवेऽपि न तत्र द्रव्यत्वाद्यनुमित्यापत्तिरिति नासङ्गतिः। यत्र घट-पटवृत्तिसंयोगत्वादिना हेतुता, घट-पटाद्यन्यतरत्वं साध्यं तत्रोभयवृत्तित्वविशिष्टाधिकरणाप्रसिद्ध्या हेतुतावच्छेदकोपलक्षित-हेतुसामानाधिकरण्यगर्भं व्याप्त्यन्तरं स्वीकरणीयं अन्यथा तद्धे-तुकतत्साध्यकानुमित्युच्छेदप्रसङ्गात्। तादृशव्याप्त्यन्तरानभ्युपगमे सादृश्यहेतुकानुमितिरप्युच्छिद्येत तद्भेदसामानाधिकरण्यसहित-तद्वृत्तिधर्म्मत्वरूपसादृश्यत्वविशिष्टाधिकरणाप्रसिद्ध्या विशिष्टाधि-करणतागर्भव्याप्त्यसम्भवात्। एवं व्यतिरेकव्याप्तिरपि हेतुताव-च्छेदकविशिष्टवैयधिकरण्यघटिता तदुपलक्षितवैयधिकरण्यघटिता चावश्यमुपेया अन्यथा एकव्यक्तिसमवेतत्वाद्यनुमितिलक्षणस्यानु-मितिसामान्ये इतरभेदानुमापकत्वानिर्व्वाहात्। न च तत्र विशिष्टवैयधिकरण्यगर्भव्याप्तिरप्यस्तीति किं व्याप्त्यन्तरेणेति वाच्यं। तादृशव्याप्तिविषयकस्य विशिष्टहेत्वधिकरणतागर्भपक्षधर्म्मताज्ञान-स्यैव हेतुताया विशिष्टसत्ताहेतुकगुणादिपक्षकगुणाद्यनुमित्या-पत्तिभयेन स्वीकरणीयतया तत्स्वीकारस्यावश्यकत्वात्। अन्यथा एतद्व्यक्तिसमवेतत्वघटितहेतुतावच्छेदकविशिष्टस्य भागासिद्ध्या अनुमितिसामान्ये तद्विशिष्टवैशिष्ट्यावगाहिप्रमात्मकपरामर्शस्या-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सम्भवादसमञ्जसम् (१)। अथैवं विशिष्टवैशिष्ट्यावगाहिज्ञाने विशिष्ट-निरूपितसमवायस्य सम्बन्धतया तेन सम्बन्धेन व्याप्तिर्हेतुतावच्छेदकसम्बन्धेन हेतुमत्त्वस्याग्रे विवक्षयैव निर्व्वहतीति कथमत्र विशिष्ट-पदोपादानम्। न च विशिष्टवैशिष्ट्यबोधे विशिष्टनिरूपितसमवाय-त्वादिना न विशेषणसम्बन्धता अपि तु शुद्ध एव समवायादिर्विशे-षणसम्बन्धः स्वविशिष्टनिरूपितसमवायादिस्तु विशेषणतावच्छेदक-सम्बन्धः इति मताभिप्रायेणेदं तथाचोक्तस्थले हेतुतावच्छेदक-सम्बन्धः शुद्धसमवाय एवेति हेतुतावच्छेदकसम्बन्धमात्रविवक्षया न प्रतीकार इति वाच्यम्। हेतुतावच्छेदकविशिष्टवैशिष्ट्यावगाहि-ज्ञाने हेतुतावच्छेदकस्य पक्षे परम्परासम्बन्धभाननियमे व्यापकता-शरीरघटकाभावाधिकरणेऽपि तदीयतादृशसम्बन्धस्य निवेशित-त्वात् तत एव हेतुतः पक्षे साध्यानुमितिनिर्व्वाहे विशिष्टत्वेन सत्त्वादेर्द्रव्यत्वादिव्याप्तिस्वीकारस्य निरर्थकताप्रसङ्गात्। न च दर्शितरीत्या विशिष्टव्यापकताग्रहस्य विशेषणव्यापकतावगाहि-त्वेऽपि विशिष्टे पक्षधर्म्मताग्रहस्य विशेषणे तदवगाहित्वेऽपि च विशिष्टहेतुकपरामर्शस्य विशेषणे साध्यसामानाधिकरण्यावगाहित्वा-नियमात् न विशेषणहेतुकानुमितिसामग्र्या विशिष्टहेतुकानुमिति-पूर्व्वमावश्यकता इति वाच्यम्। साध्ये विशिष्टहेतोर्व्यापकताग्रहे-ऽपि विशिष्टहेतौ साध्यविरोधग्रहसत्त्वेऽनुमित्यनुत्पत्त्या विशिष्ट-हेतुकस्थले विशिष्टाधिकरणत्वघटितहेतु-साध्यसामानाधिकरण्य-

(१) 'एवं व्यतिरेकव्याप्तिरपीत्यादिः 'असमञ्जसमित्यन्तः पाठः बहुषु आदर्श-पुस्तकेषु नास्ति।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विषयकस्यैव परामर्शस्यानुमितिहेतुता वाच्या, अन्यथा विरोधस्य जनकज्ञानाविरोधितया हेत्वाभासत्वस्य दुर्घटत्वप्रसङ्गात्, साध्यवति विशिष्टहेत्वधिकरणत्वभाने च विशेषणपरम्परासम्बन्धस्यापि तत्र भाननियमेन विशिष्टहेतुकपरामर्शस्य नियमतो विशेषणेऽपि साध्यसामानाधिकरण्यावगाहित्वात्। मैवं, विशिष्टनिरूपितव्यापकताशरीरे विशेषणस्य धर्म्मिपारतन्त्र्येणैव विशिष्टाधिकरणे विशेषणतया प्रवेशः न तु स्वातन्त्र्येण तथाच तद्ग्रहे न विशेषणव्यापकतावगाहित्वनियमो निर्व्वहति विशेषणनिरूपितव्यापकतायास्तद्वन्निष्ठाभावप्रतियोगितावच्छेदकत्वत्वपर्य्याप्तप्रतियोगितावच्छेदकताकाभावघटितत्वात्, विशिष्टवन्निष्ठाभावप्रतियोगितावच्छेदकत्वरूपप्रतियोग्युपरागेणाभावभाने च विशिष्टवत्तान्तर्गतविशेष्यवत्त्वपरित्यागेन विशेषणवन्निष्ठाभावप्रतियोगितावच्छेदकत्वत्वे पर्य्याप्तिभानासम्भवात् अभावप्रतियोगिप्रकारघटकस्योपलक्षणविधया भानानुपगमात्। न च परम्परासम्बन्धेन विशेषणनिष्ठव्याप्त्यवगाहिपरामर्शनिष्ठकारणताया उभयवादिसिद्धत्वात् विशिष्टहेतुकपरामर्शान्तरकारणत्वाकल्पनप्रयुक्तलाघवानुरोधेन विशिष्टस्य व्याप्तिग्रहस्थलेऽधिकरणे स्वातन्त्र्येण विशेषणवत्त्वभानमुपगम्य विशेषणेऽपि व्याप्तिभानं कल्पनीयमिति वाच्यम्। शब्दाधीनविशिष्टवत्त्वगर्भव्याप्तिग्रहस्थले स्वातन्त्र्येण विशेषणवत्त्वगर्भव्याप्तिभानानियमात्, तादृशव्याप्तिबोधकशब्दस्य स्वातन्त्र्येण विशेषणवत्त्वाभासकत्वात्। अथ तत्र तदुत्तरं विशेषणे मानसव्याप्तिग्रह एवानुमित्यर्थं कल्प्यते तत्कारणतायाः क्लृप्तत्वादिति

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

चेन्न, एवं सति दण्डाद्युपलक्षितधर्म्मिहेतुकानुमितेर्व्विलयप्रसङ्गात्, तद्धेतुकव्याप्तिग्रहस्थले परम्परासम्बन्धेनोपस्थितदण्डादौ व्याप्तिग्रहस्य कल्पनसम्भवात्। स्वातन्त्र्येण सकलपरम्परासम्बन्धघटितसकलविशेषणवत्त्वग्रहस्याप्रामाणिकतया विशेषणहेतुकपरामर्शस्य कारणतायाः क्लृप्तत्वानियमाच्च। ननु वह्निसंयोगिसंयोगाद्यात्मकसाध्यसामानाधिकरण्यस्य व्याप्तित्वे 'एकैव हि सा व्याप्तिरिति मूलग्रन्थविरोधः, महानस-पर्व्वतादिनिष्ठधूमादिगतवह्निसंयोगिसंयोगादेरैक्यासम्भवादित्यत आह, 'सामानाधिकरण्यव्यक्तीनामिति, 'भेदेऽपीति, अधिकरणभेदेन धूमादिभेदेन चेत्यादिः, निरूपकतावच्छेदकं वह्नित्वादिरूपसाध्यतावच्छेदकं धूमत्वादिरूपहेतुतावच्छेदकं, 'ऐक्यात्' साध्य-हेतुभेदेऽप्यभेदात्, तदभेदतात्पर्य्येण एकत्वव्यवहार इत्यर्थः। ननु लक्षणया तद्व्यवहारसमर्थनमसङ्गतं सामान्यप्रत्यासत्त्यभावपक्षे विशिष्टपरामर्शनिर्व्वाहार्थं व्याप्त्यैक्यकथनात्, तन्निर्व्वाहस्य (१) सामानाधिकरण्यस्य व्याप्तित्वे धूमत्वादेरैक्येऽपि पक्षीयधूमादिनिष्ठसामानाधिकरण्यस्य सामान्यप्रत्यासत्तिं विना पूर्व्वं ग्रहासम्भवेन तत्स्मरणासम्भवात् पक्षीयधूमे तदुपनयासम्भवेनायोगादतिप्रसङ्गेन (२) धूमादिव्यापकवह्न्यादिसामानाधिकरण्यमात्रस्य व्याप्तित्वासम्भवात् धूमत्वादिरूपहेतुतावच्छेदकस्य द्विधा व्याप्तिशरीरप्रवेशस्यावश्यकत्वं दर्शयन् व्याप्तेर्भेदमभेदञ्च दर्शयति, 'वस्तुतस्त्वित्यादिना, प्रथमपक्षप्रदर्शनं तत्पक्षे धूमत्वत्वाद्यप्रवे-

(१) अयोगादित्युत्तरवर्त्तिना अस्यान्वयः।

(२) भ्रमं विना रासभादिलिङ्गकवह्न्यनुमित्यापत्त्या चेत्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

शाल्लाघवेन (१) सामान्यप्रत्यासत्तिपक्षे तज्ज्ञानस्यैवानुमितिहेतुत्व-मिति सूचनाय। 'रासभादिसाधारण्यादिति, तत्साधारण्ये च भ्रमं विनापि रासभादिलिङ्गकवह्न्याद्यनुमानापत्तिरिति भावः। अथ व्यापकताप्रविष्टहेतुतावच्छेदकधर्म्मितावच्छेदककसामानाधिकरण्य-प्रकारकज्ञानस्यैवानुमितिहेतुत्वोपगमान्नायमतिप्रसङ्गः धूमत्वादि-प्रकारेण भासमाने रासभादौ साध्यसामानाधिकरण्यग्रहस्य धूमत्वाद्यंशे भ्रमत्वनियमात् वक्ष्यमाणधूमत्वादिमन्निष्ठवह्न्यादि-सामानाधिकरण्यस्य व्याप्तित्वेऽपि तद्धर्म्मितावच्छेदकतापन्नहेतु-तावच्छेदकविशिष्टवत्ताज्ञानस्य हेतुताया अवश्योपेयत्वात् अन्यथा विशिष्टसत्तादिव्यापकद्रव्यत्वादिनिरूपितविशिष्टसत्तादिनिष्ठसामा-नाधिकरण्योपलक्षितवत्ताज्ञानाद्गुणादिरूपपक्षेऽभ्रान्तस्य द्रव्यत्वा-द्यनुमानापत्तेः। साध्यसामानाधिकरण्यविशिष्टवत्त्वस्य पक्षे साध्य-निश्चयं विना दुर्निश्चयतया तदुपलक्षितवत्तानिश्चयस्यापि अनुमिति-हेतुताया उपगन्तव्यत्वात्, केवलसामानाधिकरण्यप्रकारेण पक्ष-धर्म्मताज्ञानस्यानुमितिहेतुत्वे धूमाभाववान् पक्ष इत्यसिद्धिग्रह-दशायामपि साध्ये धूमव्यापकताज्ञानादप्यनुमित्यापत्तेश्च असमान-प्रकारकतया धूमाभाववान् पक्ष इत्यादिबुद्धेर्धूमवृत्तिसामानाधि-करण्यवत्त्वान् पक्ष इत्यादिज्ञानाविरोधित्वादिति चेत्, सत्यं, 'धूम-त्वादिमति सामानाधिकरण्यमित्यस्य धूमत्वादिविशिष्टविशेषणता-पन्नं सामानाधिकरण्यमित्यर्थः, न तु धूमादिवृत्तित्वविशेषितं

(१) कारणतावच्छेदककोटाविव्यादिः, धूमव्यापकवह्निसमानाधिकरणधूमवान् पर्व्वत इत्याकारकपरामर्शस्यैवात्र पक्षे कारणत्वादिति भावः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सामानाधिकरण्यमिति तथाच एकधर्म्मिविशेषणतापन्नं धूमत्वादिरूपहेतुतावच्छेदक-साध्यसामानाधिकरण्योभयं व्याप्तिरिति पर्य्यवसितं, कारणञ्च धूमव्यापकवह्निसमानाधिकरणधूमवान् पर्व्वत इत्यादिरेव परामर्शः तावतैव च उक्तोभयस्य हेतुविशेषणतया अनुमितिजनकज्ञानविषयत्वरूपव्याप्तित्वनिर्व्वाहः। द्वितीयपक्षे च धूमव्यापकवह्निसमानाधिकरणवृत्तिधूमत्ववद्धूमवान् पक्ष इति ज्ञानं हेतुर्न तु स्वरूपतो धूमत्वाप्रकारकं तादृशधूमत्ववत्त्वान् पक्ष इत्याकारकं तादृशज्ञानस्य धूमाभाववान् पक्ष इत्याकारकधूमत्वत्वाद्यप्रकारकासिद्धिज्ञानाप्रतिबध्यत्वात्। एतन्मते च हेतुतावच्छेदकवृत्त्यसाधारणधर्म्मावच्छिन्ने साध्यसमानाधिकरणावृत्तित्वमेव विरोधः न तु हेतुतावच्छेदकावच्छिन्ने साध्यासामानाधिकरण्यं, उपदर्शितज्ञानस्य हेतुतावच्छेदकं धर्म्मितावच्छेदकीकृत्य साध्यसामानाधिकरण्यानवगाहितया तथाविधज्ञानाप्रतिबध्यत्वात्। यदि च विरोधस्यानुमितिं प्रति साक्षाद्विरोधितया हेत्वाभासत्वमुपपादयितुं शक्यते तदा समानाधिकरणवृत्तित्वांशे निर्धर्म्मितावच्छेदकं समानाधिकरणवृत्तिमद्धूमवान् पर्व्वत इत्येतादृशमपि ज्ञानं हेतुरुपेयते अन्यथा धूमत्वत्वादिविषयतायाः कारणतावच्छेदककुक्षिप्रवेशे गौरवात्, सामानाधिकरण्यप्रकारकत्वापेक्षया समानाधिकरणवृत्तिप्रकारकत्वस्य गुरुत्वेऽपि सामान्यस्याप्रत्यासत्तित्वे विशिष्टपरामर्शनिर्व्वाहानुरोधेन तेन रूपेण हेतुताया अगत्योपगमात्। 'आद्या' हेतुतावच्छेदकधर्म्मसहितसाध्यसामानाधिकरण्यरूपा, 'भिन्नेति, प्रतिधूमादिकमित्यादिः। 'द्वितीया'

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

साध्यसमानाधिकरणवृत्तिहेतुतावच्छेदकरूपा, 'अभिन्ना' सर्व्वधूमसाधारणी, अनुगतरूपावच्छिन्ननानाव्यक्तिदण्डादिविशिष्टहेतुकस्थलेऽपि परम्परासम्बन्धदण्डत्वाद्यखण्डधर्म्म एव हेतुतावच्छेदकउपगन्तव्य इति भावः। यद्यपि साध्यसामानाधिकरण्यावच्छेदकरूपवच्यमाणव्याप्त्यभिप्रायेणापि 'एकैव हीत्यादिग्रन्थः सङ्गच्छते, तथापि स्वयं तत्र स्वरूपसम्बन्धरूपावच्छेदकत्वप्रवेशस्य खण्डनीयतया स्वविशिष्टाधिकरणावृत्तियावत्साध्यासमानाधिकरणकत्वरूपपारिभाषिकावच्छेदकत्वस्यैव च विवक्षणीयतया एतदपेक्षया तादृशी व्याप्तिर्गुरुशरीरेति कथञ्चिदीदृशव्याप्तेरैक्योपपत्तिसम्भवेन तज्ज्ञानमनुमितिहेतुरित्येतादृशव्याप्तेरैक्यमुपपादितम्।

मिश्रादिमतमालम्ब्य प्रतियोग्यसमानाधिकरणपदप्रयोजनमाह, 'अयं कपिसंयोगीति। अथैतद्वृक्षत्वादेरव्याप्यवृत्तिकपिसंयोगादिव्याप्यतोपगमे कपिसंयोगाद्यनवच्छेदकमूलादेः पक्षतावच्छेदकत्वे तदवच्छेदेनापि एतद्वृक्षादौ कपिसंयोगादिसिद्धिप्रसङ्गः। न चेष्टापत्तिः, सल्लिङ्गकपरामर्शस्य भ्रमानुमित्यजनकत्वनियमात्। न च तदवच्छेदेन हेतुमत्ताज्ञानस्य तदवच्छेदेन साध्यानुमितिहेतुत्वात् एतद्वृक्षत्वादिरूपव्याप्यवृत्तिहेतोश्च किञ्चिदवच्छेदेनावृत्तेर्नातिप्रसङ्ग इति वाच्यम्। यदि स्वरूपसम्बन्धरूपावच्छेदकत्वावगाहिन्यामनुमितावपि तादृशहेतुमत्ताज्ञानत्वेन हेतुत्वमुपेयते तदापि तुल्ययुक्त्या एतद्वृक्षत्वादेरिव मूलाद्यवच्छिन्नसंयोगविशेषस्यापि कपिसंयोगादिव्याप्यतया तेन हेतुना मूलाद्यवच्छेदेन कपिसंयोगाद्यनुमितेर्निष्प्रत्यूहत्वादिति चेदत्रो-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

पाध्यायाः, साध्यस्य पक्षतावच्छेदकसामानाधिकरण्यं विना व्याप्यस्य पक्षधर्म्मत्वमनुपपन्नमिति पक्षधर्म्मताबलात् पक्षतावच्छेदकसामानाधिकरण्यमेव साध्ये सिध्यति न तु तदवच्छेद्यत्वमपि प्रमाणाभावादिति तादृशानुमितेरप्रामाणिकतया तत्र परामर्श-हेतुताकल्पनमेव नास्ति इति न तदापत्तिरिति समादधिरे ।

मिश्रादयस्तु बाधानवतारे मूलाद्यवच्छेदेन कपिसंयोगादि-सिद्धिरिष्टैव इति वदन्ति । एतत्तत्त्वं ग्रन्थकृता हेत्वाभासे वक्ष्यते ।

अनुमानदीधितिः ।

यत्तु इदं संयोगि द्रव्यत्वादित्यत्राव्याप्तिवारणाय तत् संयोगस्य शाखाद्यवच्छेदेन वृत्तेर्वृक्षत्वावच्छेदेन तत्सामान्याभाववृत्तावविरोधात् तत्र चातीन्द्रियस्य संयोगस्य सत्त्वात्परितः प्रतियोग्युपलब्धेर्दोषाद्वा वृक्षे न संयोग इत्यादि नाध्यक्षमिति तन्न, द्रव्ये संयोगसामा-न्याभावे मानाभावात् । न च यो यदीययावद्विशेषा-भाववान् स तत्सामान्याभाववानिति व्याप्तेर्यावत्सं-योगाभावा एव मानम् ।

गादाधरीविवृतिः ।

प्राचीनसिद्धव्याप्तिस्थलं दूषयितुमुपन्यस्यति, 'यत्त्विति, 'तत्' असमानाधिकरणान्तम् । ननु द्रव्ये संयोगत्वाद्यवच्छिन्ना-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भावसत्त्व एवानवच्छेदकगर्भोक्तलक्षणाव्याप्तिः प्रसज्यते तदेव न, यतः प्रतियोग्यनवच्छेदकावच्छेदेनैवाभावो वर्त्तते न तु तदवच्छेदकावच्छेदेन विरोधात् वृक्षादौ च संयोगानवच्छेदकीभूतस्तत्सामान्याभावावच्छेदक एव दुर्लभ इत्यत आह, 'संयोगस्येति, 'वृक्षत्वाद्यवच्छेदेनेति, वृक्षत्वादेः प्रत्येकं सकलसंयोगातिप्रसक्ततया तस्य संयोगावच्छेदकत्वासम्भवात्। आकाशादिसंयोगस्यापि यावद्वृक्षवृत्तेरेकस्याभावात् वृक्षत्वे तत्संयोगानतिप्रसक्तत्वासम्भवादिति भावः। ननु वृक्षत्वाद्यवच्छेदेन वृक्षादौ संयोगसामान्याभावसत्त्वे वृक्षे संयोगो नास्तीत्यादिप्रत्यक्षापत्तिरित्यत आह, 'तत्रेति, 'अतीन्द्रियस्येति, 'सत्त्वात्' अनुयोगितासम्बन्धेन सत्त्वात्, तथाच अतीन्द्रियप्रतियोगिकतया संयोगसामान्याभावस्यातीन्द्रियत्वमिति भावः। ननु संयोगसामान्याभावस्य वृक्षे सत्त्वे महदुद्भूतरूपवन्मात्रसमवेतसंयोगसामान्याभावोऽप्यावश्यकः तद्व्यापकधर्म्मावच्छिन्नाभावस्य तद्धर्म्मावच्छिन्नाभावनियतत्वात् इति योग्यमात्रप्रतियोगिकोऽयमभावः कथं न वृक्षे साक्षात्क्रियते इत्यत आह, 'परित इति, प्रतियोग्युपलब्धेर्विभिन्नावच्छेदेनाभावग्रहं प्रति विरोधिज्ञानमुद्रया प्रतिबन्धकत्वं न सम्भवतीति तस्या दोषत्वकथनं दोषविधया प्रतिबन्धकत्वलाभाय। अथ यत्र संयोगाविषयकमेव उपनीतभानाद्यात्मकं वृक्षादिरूपाधिकरणज्ञानं तदग्रिमक्षणे वृक्षादौ तादृशसंयोगसामान्याभावग्रहप्रसङ्गः तादृशदोषस्य प्रागसत्त्वात्, एवं वृक्षे न संयोग इति लौकिकप्रत्यक्षस्यालीकतया तत्र तादृशदोषस्य प्रति-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

बन्धकत्वकल्पनमेवाशक्यमिति चेन्न, वृक्षादौ संयोगसामान्याभाव-लौकिकप्रत्यक्षस्याप्रसिद्धत्वेऽपि गुणादौ तत्प्रसिद्धा अधिकरणीय-विषयतासम्बन्धेन संयोगाभावलौकिकप्रत्यक्षत्वावच्छिन्नं प्रति स्वविषयसंयोगवत्त्वसम्बन्धेन ज्ञानत्वेनैव प्रतिबन्धकत्वकल्पनात्, सर्व्वत्र द्रव्येऽन्तत ईश्वरीयप्रत्यक्षस्यैव सर्व्वदा तादृशसम्बन्धेन सत्त्वे-नातिप्रसङ्गविरहात् । इदमापाततः द्रव्यरूपाधिकरणविषयक-संयोगाभावविषयकप्रत्यक्षस्य कदाचिदप्यनुदयेन तादृशप्रत्यक्ष-सामग्र्या एवाकल्पनेनापादकाभावादेवातिप्रसङ्गवारणसम्भवेन तादृशप्रतिबन्धकताकल्पनस्याप्ययुक्तत्वात् । कथञ्चिदापत्तिसम्भवेऽपि तादात्म्यसम्बन्धेन द्रव्यत्वेनैव तादृशसम्बन्धेन (१) संयोगाभावलौ-किकं प्रति प्रतिबन्धकत्वौचित्यात् । 'मानाभावादिति लौकिकप्रत्य-क्षस्य योग्यानुपलब्धिविरहेणासम्भवात्, उपनीतभानस्य च संयोगा-भावो वृक्षावृत्तिरित्याकारकस्य विपरीतविषयकस्याप्युपनयवशेन सम्भवात्, विनिगमनाविरहेण एकतमस्य प्रामाण्यासिद्धिः, शब्दस्य चाप्तोक्तत्वासिद्धा तदव्यवस्थापकत्वात् अनुमानस्य च लिङ्गा-भावेनासम्भवादिति भावः । ननु वृक्षादौ यावत्संयोगविशेषा-भावानामुभयवादिसिद्धतया तत एव हेतोस्तत्राप्रत्यक्षस्यापि तत्सामान्याभावस्य सिद्धिर्निष्प्रत्यूहैवेति शङ्कां निरस्यति, 'न चेत्या-दिना, यः संयोगीययावद्विशेषाभाववान् स संयोगसामान्याभाववान् इति व्याप्तेरग्रे व्यर्थविशेषणत्वाप्रयोजकत्वादिदोषेण निराकरणीय-तया प्रथमतः सामान्यमुखीं व्याप्तिमनुमानोपष्टम्भकतया दर्शयति,

(१) अधिकरणीयविषयतासम्बन्धेनेत्यर्थः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'यो यदीयेति यद्धर्म्माश्रयस्य यावद्विशेषाभाववान् यः स तद्धर्म्माव-च्छिन्नाभाववानित्यर्थः, संयोगत्वाश्रयस्य विशेषधर्म्मावच्छिन्ना-भावकूटं वृक्षादौ वर्त्तते इति तत्रोक्तव्याप्तेः संयोगत्वावच्छिन्नाभाव-सिद्धिः, प्रतियोगिनो यत्त्व-तत्त्वरूपेण निवेशे संयोगवृत्तिकपिसंयोग-त्वादिरूपसामान्यधर्म्मावच्छिन्नाभावमादाय सिद्धसाधनं स्यादिति धर्म्मस्य यत्त्व-तत्त्वेनोपादानं, संयोगादिसम्बन्धावच्छिन्नसंयोगत्वाद्य-वच्छिन्नाभावमादाय सिद्धसाधनवारणाय समवायसम्बन्धावच्छिन्ना-भाव एव साधनीयः, अन्यसम्बन्धावच्छिन्नविशेषाभावकूटस्य तत्-सम्बन्धावच्छिन्नाभावव्यभिचारित्वे समवायसम्बन्धावच्छिन्नविशेषा-भावकूटस्यापि तत्सम्बन्धावच्छिन्नसामान्याभावव्यभिचारित्वं तुल्य-न्यायेन सम्भाव्येतेति प्रतियोगितावच्छेदकसम्बन्धानामपि यत्त्व-तत्त्वेन व्याप्तावन्तर्भावः। अत एव समवायसम्बन्धावच्छिन्नयाव-द्विशेषाभावहेतुना तत्सम्बन्धावच्छिन्नसंयोगसामान्याभावसिद्धिः, तद्धर्म्माश्रयविशेषाभावश्च उभयावृत्तितद्धर्म्मसमानाधिकरणधर्म्माव-च्छिन्नाभावः(१), अतः संयोगत्वाद्यपेक्षया वृक्षवृत्तिसंयोगत्वादेर्विशे-षधर्म्मत्वेऽपि संयोगसामान्याभावं वृक्षादावनभ्युपगच्छताम् अवयव-विशेषरूपावच्छेदकदुर्भिक्षेण वृक्षवृत्तिसंयोगत्वाद्यवच्छिन्नाभावस्य वृक्षादावनभ्युपगमेऽपि च न सन्दिग्धासिद्धिः, वृक्षवृत्तिसंयोगत्वा-दीनामुभयवृत्तित्वेन तदवच्छिन्नाभावव्यावृत्तिः। न च हेतावुभया-

(१) उभयावृत्तितद्धर्म्मसामानाधिकरण्यञ्च उपलक्षणविधया निविष्टं न तु विशेषणविधया अनुगततत्तद्रूपेण तद्धर्म्मावच्छिन्नाभावस्यैक्येनावयवविशेषरूपाव-च्छेदकविरहेण वृक्षादावनभ्युपगमादिति भावः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वृत्तित्वविशेषणस्यासिद्धिवारकत्वेऽपि व्यभिचारावारकतया वैयर्थ्यं यावत्त्वविशेषणस्य धीविशेषविषयत्वरूपस्य परिचायकमेव तादृश-धर्म्मावच्छिन्नप्रतियोगिताकत्वं न तु हेतुप्रविष्टं इति न सत् तथा सति यत्तत्पदार्थस्य हेतु-साध्यशरीराप्रवेशेन सामान्यमुखव्याप्तित्वा-नुपपत्तिरिति वाच्यम्। यावत्पदस्य व्यापकतार्थकतया तत्तद्धर्म्म-समानाधिकरणोभयावृत्तिधर्म्मावच्छिन्नाभावत्वनिरूपिताया आधे-यत्वसम्बन्धावच्छिन्नव्यापकताया एव हेतुतया विशेषधर्म्मव्यापक-त्वाघटकाभावान्तरस्यैव सामान्यधर्म्मव्यापकताघटकतया वैय-र्थ्यानवकाशात्। न च तादृशाभावत्वव्यापकत्वं तादृशाभाव-निष्ठभेदप्रतियोगितायामाधेयतासम्बन्धेनानवच्छेदकत्वम् एवञ्च संयोगविशेषाभावानां सर्व्वेषामेव सर्व्वाधिकरणवृत्तितया तन्नि-ष्ठभेदप्रतियोगितायामाधेयतासम्बन्धेनावच्छेदकमधिकरणमप्रसिद्धं इति तदनवच्छेदकत्वरूपहेत्वप्रसिद्धिरिति वाच्यम्। आधेयत्व-सम्बन्धावच्छिन्नावच्छेदकतासम्बन्धेन प्रतियोगिताया अभावस्यैव प्रतियोगितानवच्छेदकत्वस्थले निवेशनीयत्वात्, उक्तस्थले च व्यधिकरणतादृशसम्बन्धावच्छिन्नाभावप्रसिद्धिसौलभ्यात्। यद्धर्म्म-समानाधिकरणेत्यत्र प्रतियोगितावच्छेदकत्वेन धर्म्मो विशेषणीयः, तेन कम्बुग्रीवादिमत्त्वादिव्याप्यधर्म्मावच्छिन्नप्रतियोगिताकयावद-भाववतस्तद्धर्म्मावच्छिन्नाभावाप्रसिद्ध्या तादृशाभाववत्त्वासम्भवेऽपि न क्षतिः। न च भेदप्रतियोगितावच्छेदकवाच्यत्व-घटान्यतर-त्वादिव्याप्यधर्म्मावच्छिन्नसंयोगादिसम्बन्धावच्छिन्नप्रतियोगिताक-यावदभाववतस्तद्रूपावच्छिन्नसंयोगादिसम्बन्धावच्छिन्नप्रतियोगिता-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

काभाववत्त्वासम्भवाद्व्यभिचारः वाच्यत्वादेः संयोगादिना अवृत्तित्वात्तेन सम्बन्धेन घटादेरेव तादृशाभावविरोधितया घटत्वादेरेव तत्प्रतियोगितावच्छेदकत्वसम्भवेन गुरोरन्यतरत्वस्य तत्प्रतियोगितानवच्छेदकत्वादिति वाच्यम्। वाच्यत्वादिसाधारणस्यान्यतरनिष्ठप्रतियोगित्वस्य न्यूनवृत्तिघटत्वादिना अवच्छेदासम्भवादगत्या गुरुणाप्यन्यतरत्वादिनैव तदवच्छेदात्। वस्तुतो यत्सम्बन्धावच्छिन्नप्रतियोगिकाभावस्य साध्य-हेतुघटकता तत्सम्बन्धावच्छिन्नप्रतियोगितावच्छेदकत्वेनैव सामान्यधर्म्मस्य विशेषणीयत्वात् उक्तसामान्यधर्म्मस्य भेदप्रतियोगितावच्छेदकत्वेऽपि संयोगादिसम्बन्धावच्छिन्नप्रतियोगितानवच्छेदकतया संयोगसम्बन्धावच्छिन्नतदवच्छिन्नाभावाप्रसिद्धावपि न व्यभिचारः। अतएव भेदप्रतियोगितावच्छेदकजातित्वादिघटकनित्यत्वादेः समवायसम्बन्धावच्छिन्नप्रतियोगितावच्छेदकगर्भे निवेशस्य गौरवेणासम्भवेऽपि न जातित्वादिसामान्यधर्म्मघटितहेतोर्व्यभिचारितया सामान्यव्याप्तिभङ्गः। वस्तुतस्तु यद्धर्म्मे प्रतियोगितावच्छेदकत्वविशेषणमनुपादेयमेव कम्बुग्रीवादिमत्त्वसमानाधिकरणोभयावृत्तिधर्म्मावच्छिन्नाभावनिष्ठभेदप्रतियोगितात्वस्य घटत्वादिघटिततादृशधर्म्मापेक्षया गुरुतया तदवच्छिन्नाभावरूपव्यापकत्वाप्रसिद्धेर्यद्धर्म्मेत्यनेन कम्बुग्रीवादिमत्त्वादिरूपधर्म्मोपादानस्य गुरुधर्म्मस्याभावप्रतियोगितानवच्छेदकत्वपक्षेऽसम्भवेन व्यभिचारानवकाशात्। अभावे यावत्त्वादिविशेषणप्रवेशात् यत्किञ्चिज्जात्यादिव्यक्त्यभाववति जात्यादिसामान्याभावासत्त्वेऽपि न सामान्यव्याप्तिभङ्गः। यद्यपि यत्तदर्थघटित-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

साध्य-हेतूनामननुगमेन नैका व्याप्तिरिति संयोगसामान्याभाव-तदीयविशेषाभावकूटयोर्व्याप्तौ यावत्त्वादिविशेषणवैयर्थ्यमेव तथाप्येतद्दोषस्य स्वयमग्रे वाच्यतया यथाकथञ्चिच्छङ्कासङ्गतिः। अथ वृक्षादौ यावत्संयोगाभाववत्त्वमुभयवाद्यसिद्धं तत्र विभुसंयोगाभावावच्छेदकस्यावयवविशेषस्य दिग्विशेषस्य वा दुर्वचत्वात् ध्वंस-प्रागभावयोरत्यन्ताभावविरोधित्वे कालविशेषावच्छेदेनापि तत्र तदभावासम्भवात् तयोस्तदविरोधितामते द्रव्ये संयोगादिसामान्याभावस्याप्युत्पत्तिकालावच्छेदेन वृत्तावविरोधात्। न च मूलाग्राद्यवच्छिन्नविभुसंयोगव्यक्तीनां भेदादग्र-मूलाद्यवच्छेदेनाभावः सुलभ इति वाच्यम्। तासां भेदस्याप्रामाणिकत्वात्। न च नानावयवावच्छिन्नसंयोगव्यक्तीनामभेदे तत्संयोगव्यक्तौ तत्तदवच्छेदकव्यक्तीनां तादात्म्यसम्बन्धेन कारणतायां व्यभिचार इत्यवच्छेदकभेदेन संयोगभेद आवश्यकः आवश्यकस्यावच्छेदकव्यक्तीनां विशिष्य स्वावच्छिन्नसंयोगव्यक्तिषु हेतुताभ्युपगमः, अन्यथा मूलादिमात्रावच्छिन्नमूर्त्तान्तरसंयोगानां अग्राद्यवच्छेदेन तद्वृक्षादिवृत्तिविभुसंयोगानाञ्च वृक्षान्तरावयवावच्छेदेनानुत्पत्तिप्रयोजकस्य दुर्लभतापत्तेरिति वाच्यम् (१)। व्याप्यवृत्तेरवच्छेदकानभ्युपगमेन

---

(१) इति वाच्यम् इति सन्दर्भानन्तरं 'न च मूलाद्यवच्छिन्नेति सन्दर्भात् पूर्व्वं 'व्याप्यवृत्तेरवच्छेदकानभ्युपगमेन विभुसंयोगस्य व्याप्यवृत्तितया मूलाद्यवच्छिन्नत्वविरहेण तत्र मूलादीनां हेतुताविरहात् व्याप्यवृत्तेरवच्छेदकोपगमे तत्तदवच्छेदकस्वरूपतत्तन्निष्ठावच्छेदकताव्यक्तीनामेव तत्तदवच्छेदकजन्यतावच्छेदकसम्बन्धतया मूलाग्राद्यवच्छिन्नविभुसंयोगादीनामभेदेऽपि व्यभिचारानवकाशात् अन्यथा मूलाद्यवच्छिन्नसंयोगस्य दिग्विशेषैरप्यवच्छिन्नतया तत्राप्यवच्छेदकतासम्बन्धेन

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वृक्षादौ विभुसंयोगस्य व्याप्यवृत्तितया तदवच्छेदकतानियामकावच्छेदककारणताकल्पनानवकाशात्, मूलाद्यवच्छिन्नसंयोगस्य दिग्विशेषैरप्यवच्छिन्नतया तत्राप्यवच्छेदकतासम्बन्धेन तत्तत्संयोगव्यक्तीनामुत्पत्त्या मूलादेस्तत्र व्यभिचारस्य वारणाय तत्तदवच्छेदकस्वरूपतत्तदवच्छेदकताव्यक्तीनामेव तत्तदवच्छेदकजन्यतावच्छेदकसम्बन्धताया उपगन्तव्यतया तत एव नानावच्छेदकावच्छिन्नैकसंयोगस्वीकारेऽप्यव्यभिचारनिर्व्वाहाच्च। न च मूलाद्यवच्छिन्नसंयोगानामग्राद्यवच्छिन्नसंयोगादेरिव प्राच्याद्यवच्छिन्नसंयोगादेरपि भेदः स्वीकर्त्तुं शक्यते, मूले प्राच्यां शरीर-वृक्षसंयोग इत्यादिप्रतीत्या एकसंयोगव्यक्ताविव मूल-प्राच्याद्यवच्छिन्नत्वावगाहनात्। न चाग्र-मूलयोः शरीरसंयोग इत्यस्या इव तादृश्या अपि प्रतीतेः संयोगद्वयावगाहित्वमस्मदनुमतमिति वाच्यम्। यत्र मूल-प्रतीचीमात्रावच्छिन्न एकशरीरसंयोगः अग्र-प्राचीमात्रावच्छिन्नश्च शरीरान्तरसंयोगस्तत्र मूले प्राच्यां शरीरसंयोग इति प्रत्ययापत्तेः, शरीर-तरुसंयोगव्यक्तीनामेकैकासामेव शरीरावयवेन वृक्षावयवेन चावच्छिन्नतया व्यभिचारस्यापि दर्शितसम्बन्धसङ्कोचमन्तरेण दुर्व्वारत्वाच्च। तत्तदवच्छेदकावच्छिन्ननानासंयोगसाधारणं तत्तदवच्छेदकावच्छिन्नत्वमेव तत्तदवच्छेदकजन्यतावच्छेदकं न तु संयोगनिष्ठतत्तद्व्यक्तित्वं अनन्तकार्य्यकारणभावप्रसङ्गात्। तथाच एकावच्छेदकावच्छिन्नसंयोगस्यापरावच्छेदका-

---

तत्संयोगव्यक्तीनामुत्पत्त्या मूलादेस्तत्र व्यभिचारस्य दुर्व्वारत्वात्, इति पाठः क्वचिदादर्शपुस्तके वर्त्तते।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

वच्छिन्नत्वेऽपि तदवच्छिन्नत्वविशिष्टस्य नान्यत्रोत्पत्तिरिति न व्यभिचारशङ्का इति वदन्ति ।

यत्तु संयोगमात्रस्याव्याप्यवृत्तितासिद्धान्तानुरोधेन मूलाग्रावच्छिन्नतरु-विभुसंयोगादीनां भेदस्वीकार आवश्यक इति, तदपि न सम्यक्, तादृशसंयोगव्यक्तीनां गगनादौ दिग्देशविशेषरूपावच्छेदकनियमेनैव तादृशसिद्धान्तसङ्गतेः ।

अत्र वदन्ति द्रव्यमात्र एव संयोगसामान्याभावस्याप्रामाणिकतायाः 'तन्नेत्यादिनोक्तेः 'न चेत्यादिना गगनादाविव संयोगसामान्याभावसाधकमनुमानमाशङ्कितं, विभुद्वयसंयोगानभ्युपगमेन तत्र यावत्संयोगव्यक्तीनामेव प्रतिनियतदिग्देशावच्छिन्नतया तत्तद्दशक्तित्वेन तत्र तदभावसत्त्वेऽविवाद एव इति नासिद्धावकाशः, विभुमात्रे संयोगसामान्याभावसिद्धावपि संयोगि द्रव्यत्वादित्यत्र व्यावृत्तिसङ्गतेर्वृक्षादावेतद्व्याप्तिबलात् संयोगसामान्याभावासिद्धावपि न क्षतिः । प्रतियोग्यनवच्छेदकस्य तदवच्छेदकत्वनियमसत्त्वे च वृक्षत्वाद्यवच्छेदेन वृक्षादावपि संयोगसामान्याभावसिद्धिसम्भवेन तत्रापि तदभावं साधयतां तादृशनियमवादिनामाशङ्कां 'न च प्रतियोग्यनवच्छेदकवृक्षत्वादेरभावावच्छेदकत्वमित्यादिना निराकरिष्यते पूर्व्वमपि वृक्षत्वाद्यवच्छेदेन संयोगसामान्याभाववृत्तेरविरोधमात्रेण प्रतियोग्यनवच्छेदकस्याभावावच्छेदकत्वनियमेन वा सेद्धुमर्हतीत्याशयेनैव वृक्षादौ संयोग-तत्सामान्याभावयोर्वृत्तावच्छेदकभेद उपपादितः वृक्षे न संयोग इति प्रत्यक्षञ्च वारितं न तु यो यदीयेत्यादिनियमस्य तत्सा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

धकत्वाशयेनेति न सन्दर्भविरोधः। यत्किञ्चिदवयवनाशान्महावृक्षनाशानन्तरं खण्डवृक्षोत्पत्तिक्षणे पूर्व्वोत्पन्नक्रियातो यत्रावस्थितयावत्तदवयवैर्गगनादिसंयोगानां (१) विनाशः द्वितीयक्षणे च खण्डवृक्षस्यापरावयवनाशस्तृतीयक्षणे च तन्नाशस्तत्र तद्वृक्षे विभुसंयोगानुत्पत्त्या यावद्विशेषाभावसौलभ्यम्। न चैवं तादृशवृक्षे मूर्त्तान्तरेणापि संयोगस्तदवयवसंयोगैस्तत्कर्म्मणा वा न सम्भवति तदवयव-गगनादिसंयोगनाशककर्म्मणा मूर्त्तान्तर-तदवयवसंयोगानामपि तदुत्पत्तिकाले विनाशात्, अवयवावयविनोः संयोगानभ्युपगमेन अवयवेषु आरम्भकसंयोगसत्त्वेन तन्निष्ठसंयोगजननासम्भवात्, उत्पत्तिकाले च द्रव्ये गुणवत्कर्म्मसत्त्वानुपपत्तेरिति संयोगसाध्यकद्रव्यत्वस्य सद्धेतुतैव न निर्व्वहतीति वाच्यम्। तादृशखण्डद्रव्ये तदवयवसंयोगजन्यस्य तत्कर्म्मजन्यस्य च संयोगस्यासम्भवेऽपि सर्व्वत्रैव सदागतिशीलपवनादिपरमाणूनां कर्म्मभिस्तत्संयोगानामुत्पत्तौ बाधकविरहेण द्रव्यस्य संयुक्तत्वनियमादित्यपि केचित्। 'यावत्संयोगाभावा एव मानमिति ज्ञायमानलिङ्गस्यानुमितिकरणत्वमताभिप्रायेण, 'यत्तदर्थयोरिति साध्य-हेतुघटकयत्तच्छब्दार्थयोः संयोगत्व-घटत्वाद्योरित्यर्थः, 'अननुगमादिति एकरूपेण निवेशासम्भवादित्यर्थः, एकव्याप्तेर्निर्व्वाहयितुमशक्यत्वादिति शेषः, तथाच घटत्वाद्यवच्छिन्नाभाव घटादिविशेषाभावकूटयोर्व्याप्तिः संयोगसामान्याभावसिद्धावनुपयोगित्वात् यावत्संयोगविशेषाभावे संयोगसामा-

(१) तदवयवावच्छिन्नगगनादिसंयोगानामित्यर्थः, यावत्तदवयवे गगनादिसंयोगानां इति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न्याभावीयविशेषव्याप्तेस्त्याग्रे निराकर्त्तव्यत्वान्नोक्तानुमानसम्भव इति भावः। ननु प्रकृतहेतौ प्रकृतसाध्यव्याप्तेरग्रहेऽपि यथा यो यत्र प्रवर्त्तते स कार्य्यतया तज्जानातीत्याकारात्स्तनपानादिप्रवृत्ति-तद्विषयककार्य्यताज्ञानयोर्व्याप्तिग्रहाद्गवानयनादिप्रवृत्तिरूपलिङ्गेन गवानयनादिकार्य्यताज्ञानसिद्धिः तथा प्रकृते संयोगीययावद्विशेषा-भावे तत्सामान्याभावस्य व्यर्थविशेषणत्वादिना व्याप्त्यग्रहेऽपि घटादिविशेषाभावकूटे तत्सामान्याभावव्याप्तिग्रहादेव संयोगीय-यावद्विशेषाभावे पक्षधर्म्मताज्ञानाद्गगनादौ (१) संयोगसामान्या-भावसिद्धिर्दुर्व्वारैव व्यतिरेकिहेतुकानुमिताविव सामान्यव्याप्त्यधीन-विशेषसिद्धौ व्याप्तिविशिष्टपक्षधर्म्मताज्ञानस्य हेतुत्वानुपगमात् (२)। न च विशेषभावान्तरे सामान्याभावान्तरव्याप्तिग्रहात् संयोग-विशेषाभावेन तत्सामान्याभावसिद्ध्युपगमे यावत्त्वाद्यविशेषितकपि-संयोगादिप्रतियोगिकाभावे(३) कपिसंयोगादिसामान्याभावव्याप्ति-ग्रहादेव संयोगप्रतियोगिकाभावेन तत्सामान्याभावसिद्धिसम्भ-वात् यावत्त्वादिविशेषणमनर्थकं प्रकृतहेतुतुल्यनिखिलहेत्वन्तरेषु तत्प्रविष्टतत्तत्पदार्थघटितप्रकृतसाध्यतुल्यसाध्यव्याप्तिग्रहापेक्षायाः स्वीकर्त्तुमशक्यत्वात् तादृशसकलहेतु-साध्यानां युगसहस्रेणापि

(१) वृक्षादाविति पा०।

(२) तथाच यथा व्यतिरेकिस्थले हेतौ व्याप्तिग्रहकालीनस्य पक्षे हेतुमत्ता-ज्ञानस्य ज्ञानविशिष्टज्ञानत्वेन हेतुत्वं तथा प्रकृतपक्षे प्रकृतहेतुमत्ताज्ञानकालीनस्य विशेषाभावान्तरे सामान्याभावान्तरव्याप्तिग्रहस्य ज्ञानविशिष्टज्ञानत्वेनैव हेतुत्वं बोध्यमिति भावः।

(३) कपिसंयोगप्रतियोगिकत्वं अभावे न निवेशनीयं व्यर्थविशेषणत्वात्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

असर्व्वैर्ज्ञातुमशक्यत्वात् इति वाच्यम्। उपस्थितयावत्तादृश-हेतुषु तादृशतत्तत्साध्यव्याप्तिग्रहापेक्षया सामञ्जस्यात् तावन्मात्रा-पेक्षायाश्च तत्तत्साधनधर्म्मिकतत्तत्साध्यव्याप्तिग्रहाभावविशिष्टतत्त-त्साध्यसाधनोपस्थितिरनुमितिप्रतिबन्धकतया सूपपादत्वात्। एवं सति (१) यावत्त्वविशेषणानुपादाने जात्यादिविशेषघटत्वाद्यभावे जात्यादिसामान्याभावव्यभिचारोपस्थितिदशायां संयोगादिसामा-न्याभावसाधनासम्भवेन तादृशविशेषणसार्थक्यात् (२), गगनाद्य-वृत्ति-स्वसमानाधिकरणनिरुक्तधर्म्मावच्छिन्न(३)प्रतियोगिताकय-त्किञ्चिदभावकं यद्‌यत् तदन्यो गगनादिवृत्त्यभावप्रतियोगितावच्छे-दकोभयावृत्तिधर्म्मसमानाधिकरणान्यो वा यो धर्म्मः स तन्निष्ठा-भावप्रतियोगितावच्छेदक इत्येतादृश्या उक्तसामान्यव्याप्तिस्थला-भिषिक्तव्याप्त्यैव वा संयोगत्वादौ गगनादिनिष्ठाभावप्रतियोगिताव-च्छेदकत्वं साधनीयं तत्र च नाननुगमदोष इत्याशङ्क्य उक्तानुमाने-उपाधिमाह, 'एकावच्छेदेनेति अनवच्छिन्नतदीययावद्विशेषा-भावाधिकरणत्वस्योपाधित्वादित्यर्थः, यथाश्रुते गुणादिनिष्ठायाः यावत्संयोगाभावाधिकरणताया व्याप्यवृत्तितया अवच्छेदकत्वविर-हेण उपाधेः साध्यव्यापकत्वानिर्वाहात्। न च गुणादिनिष्ठाया-यावत्संयोगाभावाधिकरणताया व्याप्यवृत्तित्वेऽपि गुणत्वाद्यवच्छि-

---

(१) साध्यव्याप्तिग्रहस्यापेक्षितत्वे सतीत्यर्थः।

(२) तथाच यत्किञ्चिज्जात्यभाववति जातिसामान्याभावासत्त्वाद्‌व्यभिचार-वारणाय यावत्पदम्।

(३) उभयावृत्तिधर्म्मावच्छिन्नेत्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

न्नत्वमावश्यकम् अन्यथा अधिकरणतावच्छेदकप्रकारकज्ञानासम्भवेन (१) गुणादौ तदभावग्रहासम्भवादिति वाच्यम् । द्रव्यनिष्ठयावत्संयोगाभावाधिकरणताया अपि द्रव्यत्वादिरूपैकावच्छेदकावच्छिन्नतया उपाधेः साधनाव्यापकतानिर्वाहाय सप्तमीनिर्देश्यं यदव्याप्यवृत्तितानिर्वाहकं विलक्षणमवच्छेद्यत्वं तस्यैव विवक्षणीयतया गुणानिष्ठसंयोगाभावाद्यधिकरणतायां तादृशावच्छेद्यत्वविरहेण साध्यव्यापकताया यथाश्रुति दुरुपपादत्वात् । अथैवं कपिसंयोगादिसामान्यस्य मूलाद्यवच्छेदेनाभाववति कपिसंयोगादिमद्वृक्षादौ अनवच्छिन्नतदीययावद्विशेषाभाववत्त्वविरहेण साध्योपाध्योर्न सामान्यव्याप्तिनिर्वाहः (२) । अत्र केचित् अवच्छिन्नत्वैकावच्छेदकानवच्छिन्नत्वोभयाभाववद्यावद्विशेषाभाववत्त्वम् इहोपाधित्वेनाभिमतं गुणे यावद्विशेषाभाववत्त्वम् अवच्छिन्नत्वाभावेनोक्तोभयाभाववत्, कपिसंयोगवति वृक्षे कपिसंयोगीययावद्विशेषाभाववत्त्वं मूलाद्येकावच्छेदकावच्छिन्नमिति तदनवच्छिन्नत्वाभावादुभयाभाववदिति(३) नोपाधि-साध्ययोः सामान्यव्याप्तिभङ्गः ।

---

(१) अभावलौकिकप्रत्यक्षे अधिकरणतावच्छेदकप्रकारकज्ञानस्य हेतुत्वादिति भावः ।

(२) तथाच प्रकृतसाध्यतुल्यसाध्ये प्रकृतोपाधितुल्यव्याप्तिरत्योपाधित्वनिर्व्वाहिका यो यद्धर्म्मावच्छिन्नप्रतियोगिताकाभाववान् स निरवच्छिन्नतद्धर्म्मसमानाधिकरणोभयावृत्तिधर्म्मावच्छिन्नप्रतियोगिताकयावदभावाधिकरणतावान् इत्याकारा सैव साध्योपाध्योः सामान्यव्याप्तिरिति भावः ।

(३) कपिसंयोगवति वृक्षे संयोगीययावद्विशेषाभाववत्त्वं मूलाद्येकावच्छेदकानवच्छिन्नत्वाभावादुभयाभाववदितीति पा० ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अथ वृक्षादिनिष्ठानां यावत्कपिसंयोगविशेषाभावाधिकरणतानां नैकावच्छेदकावच्छिन्नत्वं सम्भवति वृक्षाद्यवृत्तिकपिसंयोगादिव्यक्तीनां येऽभावास्तेषां वृक्षादौ व्याप्यवृत्तितया तन्निष्ठतदधिकरणतानामनवच्छिन्नत्वात्। न च व्याप्यवृत्त्यधिकरणतानामनवच्छिन्नतया अन्यासाञ्चैकावच्छेदकावच्छिन्नतया सर्वास्वधिकरणतासूभयाभावोऽक्षत एवेति वाच्यम्। एवं सति पक्षनिष्ठसंयोगव्यक्तीनां दिग्देशविशेषाद्यवच्छिन्नानां यावन्तोऽभावाः पक्षनिष्ठतावन्निरूपिताधिकरणतानां सर्वासामेकावच्छेदकविरहेऽपि द्वित्वादीनामवच्छेदकैक्यसम्भवेन सर्वास्वेव तासु तादृश-तादृशावच्छेदकमादाय एकावच्छेदकावच्छिन्नत्वमस्तीत्युभयाभावसत्त्वात् तदवृत्तिसंयोगव्यक्तीनाञ्च येऽभावास्तेषां तन्निष्ठाधिकरणताकूटानामनवच्छिन्नतया उभयाभावसत्त्वात् उक्तोपाधेर्यावत्संयोगाभावरूपसाधनव्यापकत्वापत्तेः, स्वसमानाधिकरणयावत्तदभावाधिकरणतावच्छेदकावच्छिन्नत्वस्य एकावच्छेदकावच्छिन्नत्वरूपत्वे च (१)वृक्षादिनिष्ठमूलाद्यवच्छिन्नकपिसंयोगाद्यभावाधिकरणतास्वपि न तथात्वसम्भवः तत्समानाधिकरणव्याप्यवृत्तिकपिसंयोगाद्यभावाधिकरणतानामपि तादृश-यावदधिकरणतान्तर्गतत्वात् तदवच्छेदकस्य चाप्रसिद्धत्वात् इति चेन्न, एकावच्छेदकावच्छिन्नत्वस्य स्व(२)-समानाधिकरणकिञ्चिदवच्छिन्नयावत्तदभावाधिकरणतावच्छेदकावच्छिन्नत्वरूपस्य विवक्षितत्वेन अनवच्छिन्नाधिकरणताभिः

(१) उभयाभावघटकीभूतैकावच्छेदकावच्छिन्नत्वे चेति पा०।

(२) स्वपदं प्रतियोगिपरं न तु तदभावाधिकरणतापरम्।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सहावच्छिन्नाधिकरणतानामेकावच्छेदकावच्छिन्नत्वासम्भवेऽपि च- तिविरहात् । अथवा यावद्विशेषाभाववत्त्वमित्यनेन यावत्तदीय- विशेषाभावत्वावच्छिन्ननिरूपितमेकाधिकरणत्वं विवक्षितं न तु तत्समुदायः (१) एकावच्छेदकावच्छिन्नत्वञ्च एकमात्रवृत्तिधर्मावच्छिन्नावच्छेदकावच्छिन्नत्वं न त्वभिन्नावच्छेदककत्वं, वृक्षावृत्ति- कपिसंयोगानां वृक्षनिष्ठा अभावा यद्यपि व्याप्यवृत्तयः तथाप्य- व्याप्यवृत्तिसाधारणयावत्त्वेन तेषामव्याप्यवृत्तित्वात् तत्- साधारणयावत्त्वावच्छिन्ननिरूपिताधिकरणता एकमात्रवृत्ति- तत्तन्मूलत्वाद्यवच्छिन्नतत्तन्मूलादिरूपावयवावच्छिन्नेति तत्रोभया- भावोऽक्षत इति न साध्योपाध्योः सामान्यव्याप्तिभङ्गः, पक्षनिष्ठ- संयोगसामान्यीययावद्विशेषाभावाधिकरणता च न प्रत्येका- वच्छेदकावच्छिन्ना अस्यां दिशि अत्र देशे वा गगने न संयोग- इत्यादिप्रतीतिविरहात् अपि तु यत्किञ्चिदनुगतधर्मावच्छि- न्नावच्छेदकावच्छिन्ना यावत्संयोगाभाववद्गगनमित्यादिप्रत्ययात्, एकरूपावच्छिन्नस्य प्रतियोग्यभावाधिकरणतावच्छेदकत्वे विरोधात् एकस्यापि विशेषरूप-सामान्यरूपाभ्यामुभयावच्छेदकत्वोपगमात् तथाच पक्षनिष्ठसंयोगविशेषाभावानां यावत्त्वावच्छिन्ननिरूपिता- धिकरणता न निरुक्तैकावच्छेदकावच्छिन्नत्ववतीति तस्या उक्तो- भयवत्त्वादुपाधेः साधनाव्यापकत्वमिति वदन्ति ।

वस्तुतस्तु अनवच्छिन्नयावद्विशेषाभाववत्त्वमेवोपाधिः तादृशो- पाधिना साध्यस्य सामान्यव्याप्तिविरहेऽपि संयोगसामान्या-

(१) यावद्विशेषाभावाधिकरणतासमुदायः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

भावरूपपर्य्यवसितसाध्यव्यापकतया ताहृशोपाधेः सत्प्रतिपक्षो-त्थापकत्वमव्याहतं तादात्म्येन साध्यवतोऽप्युपाधिव्याप्यतया ताहृ-शोपाध्यभावेन संयोगसामान्याभावरूपसाध्यवद्भेदोऽन्यत्राप्रसि-द्धोऽपि (१) साधयितुं शक्यत एव अभावसाध्यकव्यतिरेकिणि प्रतियोगिमात्रप्रसिद्धेरपेक्षितत्वात् उपाध्यभावेन साध्याभावसाध-नन्तु न सम्यक्संयोगरूपस्य तस्य साधने सिद्धसाधनात् सत्प्रति-पक्षानिर्वाहात् सिद्धसाधनादितः साध्याभावादिसाधनासम्भवेऽपि प्रतियोगिवैयधिकरण्यघटितसाध्यव्यापकतावच्छेदकतया गृह्य-माणोपाधितावच्छेदकावच्छिन्नाभाववत्ताज्ञानात् पक्षे साध्यानु-मितिप्रतिरोधः (२) एवेति सारम्। अथवा प्रतियोग्यधिकरण-त्वरूपपक्षधर्म्मावच्छिन्नसामान्याभावरूपसाध्यव्यापकतया एकाव-च्छेदेनेत्यादेर्यथाश्रुतस्यैवोपाधितानिर्वाहः, यत्र प्रतियोगिमति यस्य सामान्याभावस्तत्रैकावच्छेदेन तस्य यावद्विशेषाभाववत्त्व-मिति सामान्यव्याप्तेः कपिसंयोगादिमतः कपिसंयोगादिसामा-न्याभावाधिकरणवृक्षादेरेकावच्छेदेन कपिसंयोगादिविशेषाभाव-कूटवत्त्वनियमेन सुग्रहत्वात्, गुणादावेकावच्छेदेन यावद्विशेषा-भावासत्त्वेऽपि तत्र तत्प्रतियोग्यसत्त्वेनावच्छिन्नसाध्यव्यापकत्वा-क्षतेः द्रव्ये च प्रतियोगिमत्त्वविशिष्टयावत्संयोगविशेषाभावाधि-करणे एकावच्छेदेन तदीययावद्विशेषाभावासत्त्वात् साधनाव्याप-

(१) पक्षे अप्रसिद्धोऽपीत्यर्थः।

(२) तद्वत्ताबुद्धिं प्रति तद्धर्म्मे तद्व्यापकतावच्छेदकत्वग्रहसहिततद्धर्म्मावच्छिन्ना-भाववत्तानिश्चयत्वेन प्रतिबन्धकत्वादिति भावः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

कत्वं तस्य, वृत्त्यादिवृत्तिकपिसंयोगादिविशेषाभावाधिकरणता-कूटान्तर्गतकतिपयाभावाधिकरणतानामनवच्छिन्नत्वेऽपि तत्कूटस्य एकावच्छेदकावच्छिन्नत्वं पूर्व्ववदुपपादनीयम्। अथैतादृशोपाधेर्व्य-भिचारोन्नायकत्वं सत्प्रतिपक्षोत्थापकत्वं वा न सम्भवति प्रकृतसाध्य-व्यापकस्य एकावच्छेदकावच्छिन्नसंयोगीययावद्विशेषाभाववत्त्वस्या-सिद्धेः द्रव्ये तदीययावद्विशेषाभाववत्त्वस्यावच्छिन्नत्वेऽपि एकाव-च्छेदकावच्छिन्नत्वाभावात् गुणे च तस्यावच्छिन्नताया एवाभावात् प्रतियोगिमत्त्वविशिष्टकपिसंयोगीयसामान्याभावव्यापकस्य तदीयै-कावच्छेदकावच्छिन्नयावद्विशेषभाववत्त्वस्य प्रसिद्धत्वेऽपि तदभावेन प्रकृतसाध्यवद्भेदसाधनं न सम्भवति तस्य प्रकृतसाध्याव्यापकत्वात् प्रतियोगिमत्त्वविशिष्टकपिसंयोगादिसामान्याभाववद्भेदस्य कपि-संयोगादिरूपप्रतियोगिशून्ये हेतुमति साध्यमानो न कपिसंयोगा-दिसामान्याभाववद्भेदपर्य्यवसायी प्रतियोगिमद्भेदस्याबाधात् प्रति-योगिमति चैकावच्छेदकावच्छिन्नतदीययावद्विशेषाभावसत्त्वेन तद्-वत्ताभावादिरूपहेतोरसिद्धिरिति (१) न व्यभिचारोन्नयनसम्भव-इति (२) मैवं, क्वचिद्द्रव्ये जलादिसंयोगवति तत्सामान्याभावस्य सत्त्वे एकावच्छेदकावच्छिन्नतदीययावद्विशेषाभावसत्त्वात् तदीय-प्रतियोगिमत्त्वविशिष्टतत्सामान्याभावव्यापकं एकावच्छेदकाव-च्छिन्नतदीययावद्विशेषाभाववत्त्वं यावद्द्रव्ये सर्व्वावयवावच्छेदेन विभिन्ना जलादिसंयोगव्यक्तयः वर्त्तन्ते यावद्विशेषाभावरूप-

(१) तादृशाभावादिरूपहेतोरसिद्धिरिति पा०।

(२) न व्यभिचारोन्नयननिर्व्वाह इतीति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हेतुमति एकावच्छेदकावच्छिन्नयावद्विशेषाभावरूपोपाध्यभावेन प्रतियोगिमत्त्वविशिष्टसामान्याभाववद्भेदस्य सिद्धौ बाधकाभावात्, प्रतियोगिमति तत्र विशिष्टवद्भेदपर्य्यवसानेन व्यभिचारसिद्धा सामान्यव्याप्तिभङ्गात् । संयोगत्वे गगनादिनिष्ठाभावप्रतियोगितावच्छेदकत्वसाधकानुमानौपयिकदर्शितव्याप्तावपि एकावच्छेदकावच्छेद्य-स्व(१)समानाधिकरणोभयावृत्तिधर्म्मावच्छिन्नप्रतियोगिताकयावदभावाधिकरणताशून्यगगनादिकं यद्‌यत् तदन्यत्वस्योपाधित्वं बोध्यम् ।

अनुमानदीधितिः ।

यत्तदर्थयोरननुगमात् एकावच्छेदेन यावद्विशेषाभाववत्त्वस्योपाधित्वाच्च । एतेन अयं संयोगसामान्याभाववान् संयोगयावद्विशेषाभाववत्त्वादिति परास्तं व्यर्थविशेषणत्वादप्रयोजकत्वान्निर्गुणत्वादेरुपाधित्वाच्च । न च प्रतियोग्यनवच्छेदकतयैव वृत्तत्वादेरभावावच्छेदकत्वं, गुणाद्यनवच्छेदकप्रमेयत्वादेस्तदभावावच्छेदकत्वप्रसङ्गात् । यथाच घटपूर्व्ववर्त्तित्वस्य प्रतिदण्डं वह्निसामानाधिकरण्यस्य वा प्रतिधूमं भिन्नत्वेऽपि दण्डत्वं धूमत्वं वा तत्सामान्यस्यावच्छेदकं तथैव संयोगसामान्यस्यावच्छेदकं द्रव्यत्वादिकमित्यस्यापि सुवचत्वाच्चेति सम्प्रदायविदः ।

---

(१) स्वपदं संयोगत्वादिपरम् ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गादाधरी विवृतिः ।

'एतेनेति अनवच्छिन्नयावत्संयोगविशेषाभाववत्त्वस्योपाधित्वेनेत्यर्थः, 'इति' विशेषव्याप्त्युपष्टब्धमनुमानं, 'परास्तं', दूषणान्तरमाह, 'व्यर्थेति तन्मते संयोगसामान्याभावस्य केवलान्वयितया अभावत्वस्यैव तद्व्याप्यतावच्छेदकत्वेन इतरांशस्य व्यर्थत्वादित्यर्थः । नन्वभावादित्येव हेतुरस्तु इत्यत आह, 'अप्रयोजकत्वादिति व्याप्तिग्राहकतर्कशून्यत्वादित्यर्थः, विशेषव्याप्तावुपाध्यन्तरमपि सुलभमित्याह, 'निर्गुणत्वादेरिति, आदिना निष्परिमाणत्वादेरपि परिग्रहः । यत् यद्धर्माश्रयानवच्छेदकं तत्तद्धर्मावच्छिन्नाभावावच्छेदकमिति व्याप्त्युपष्टब्धं वृत्तत्वादेः संयोगसामान्याभावावच्छेदकत्वसाधकमनुमानमाशङ्क्य निराकुरुते, 'न चेति, 'गुणाद्यनवच्छेदकेति गुणत्वस्याश्रयानवच्छेदकेत्यर्थः, 'तदभावेति गुणत्वावच्छिन्नाभावेत्यर्थः, तथाच गुणत्वावच्छिन्नाभावस्यापि अव्याप्यवृत्तिताप्रसङ्ग इति भावः । घटादौ द्रव्यत्वाद्यवच्छेदेन घटत्वाभावप्रसङ्गः घटत्वादेर्व्याप्यवृत्तितया तदवच्छेदकाप्रसिद्ध्या तदनवच्छेदकत्वरूपापादकाप्रसिद्धेर्न सम्भवतीति नाभिहितम् । गुणत्वाद्याश्रयस्य संयोगादेरवच्छेदकत्वप्रसिद्ध्या न गुणत्वाद्यवच्छिन्नाभावावच्छेदकत्वापादकाप्रसिद्धिरिति भावः । ननु यद्धर्माश्रयानवच्छेदकमित्यत्र यत्पदेन व्याप्यवृत्त्यवृत्तिधर्म्म एव विवक्षणीयः गुणत्वादेश्च व्याप्यवृत्तिरूपादिवृत्तितया तदाश्रयानवच्छेदकत्वस्य न तदवच्छिन्नाभावावच्छेदकतापादकता इत्याशङ्क्य वृत्तत्वादौ संयोगत्वाश्रयानवच्छेदकत्वरूपसंयोगत्वावच्छिन्नाभावावच्छेदकत्वसाधक-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

हेतोरसिद्धिमाह, 'यथा चेति, 'घटपूर्व्ववर्त्तित्वस्येति दण्डनिष्ठ-घटकारणताघटकतदव्यवहितपूर्व्वकालसम्बन्धस्येत्यर्थः, 'प्रतिदण्डं भिन्नत्वेऽपि' 'दण्डत्वं तत्सामान्यावच्छेदकमित्यग्रिमेनान्वयः, 'प्रति-दण्डं भिन्नत्वेऽपि' इत्यनेन च दण्डत्वं तत्प्रत्येकातिप्रसक्तमिति सूचितं, एवमग्रेऽपि, 'तत्सामान्येति घटपूर्व्ववर्त्तितात्वावच्छिन्नेत्यर्थः, प्रत्ये-कातिप्रसक्तत्वेऽपि अवच्छेद्यतावच्छेदकानुगतरूपावच्छिन्नानति-प्रसक्ततया तस्यावच्छेदकत्वं, अन्यथा घटकारणतावच्छेदकत्वमेव तस्य भज्येतेति भावः। ननु दण्डत्वस्य घटनियतपूर्व्ववर्त्तितावच्छे-दकत्वं न घटनियतपूर्व्ववर्त्तितायाः स्वरूपसम्बन्धरूपमवच्छेदकत्वं अपितु तदव्यवहितपूर्व्वकालनिष्ठाभावप्रतियोगितानवच्छेदकत्वरूपं पारिभाषिकमेव तच्च(१) अतिप्रसक्तेऽनतिप्रसक्ते च निराबाधमेव(२) स्वरूपसम्बन्धरूपावच्छेदकताया एवावच्छेद्यानतिप्रसक्तत्वनियतत्वा-दिति (३) प्रत्येकातिप्रसक्तस्य सामान्यानतिप्रसक्तत्वेन सामान्य-रूपावच्छिन्नावच्छेदकत्वे दृष्टान्तान्तरमाह, 'वह्निसामानाधिकर-ण्यस्येति, 'प्रतिधूमं भिन्नत्वेऽपि' 'धूमत्वं तत्सामान्यावच्छेदकमि-त्यन्वयः, 'तत्पदेनात्र वह्निसामानाधिकरण्यपरामर्शः, धूमत्वस्य तदनवच्छेदकत्वे तस्य वह्निव्याप्यतावच्छेदकत्वं नोपपद्यते। न च

(१) तथाचातिप्रसक्तस्य तादृशावच्छेदकत्वं स्वीक्रियते न तु स्वरूपसम्बन्धरूपा-वच्छेदकत्वं अतिप्रसक्तस्येति भावः।

(२) अतिप्रसक्तेऽपि वर्त्तत इति पा०।

(३) तथाच घटपूर्व्ववर्त्तिताया अतिप्रसक्तत्वेन दण्डत्वस्य कारणतावच्छेदकत्वं स्वीक्रियते न तु दण्डत्वं कारणतानतिप्रसक्तमिति अतिप्रसक्तस्यावच्छेदकत्व-स्वीकारे दृष्टान्तासम्भव इति भावः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

व्याप्यतावच्छेदकत्वमपि स्वविशिष्टव्यापकसाध्यकत्वरूपं पारिभाषिकमेव तच्चातिप्रसक्तसाधारणमिति न दृष्टान्तसङ्गतिरिति वाच्यम् । साध्यसामानाधिकरण्यावच्छेदकरूपवत्त्वं व्याप्तिस्तत्तावच्छेदकत्वं स्वरूपसम्बन्धविशेषः, अतएव यत्र व्यर्थविशेषणघटितनीलधूमत्वादिना हेतुना तत्र व्याप्यत्वासिद्धिरिति प्राचीनमतानुसारेणैतदभिधानात्, अन्यथा पुनः स्वरूपसम्बन्धरूपकारणत्वप्रतियोगित्वादिनिरूपितमनुगतधर्म्मनिष्ठं स्वरूपसम्बन्धरूपमवच्छेदकत्वं दृष्टान्ततया बोध्यं, संयोगसामान्यस्य संयोगत्वरूपावच्छेद्यतावच्छेदकरूपावच्छिन्नस्य सुवचत्वाच्चेति प्रत्येकं संयोगादिव्यक्त्यतिप्रसक्तस्यापि द्रव्यत्वादेस्तद्रूपावच्छिन्नानतिप्रसक्तत्वादिति भावः । यद्यप्येवमपि प्रमेयत्वादेः संयोगसामान्यातिप्रसक्तत्वेन तत्सामान्यावच्छेदकत्वासिद्धा उक्तव्याप्तिबलात् तदवच्छेदेन संयोगसामान्याभावसिद्धिर्न शक्यते निराकर्त्तुं, तथापि प्रतियोगिमत्सम्बद्धदेश-कालयोरेव प्रतियोग्यनवच्छेदकयोरभावावच्छेदकत्वनियमः तयोरेव (१) तदनुभवात् न तु प्रतियोग्यनवच्छेदकमात्रस्य मानाभावादित्यत्र तात्पर्य्यम् । द्रव्ये संयोगसामान्याभावस्य कालभेदावच्छेदेन स्वयमनुपदं व्यवस्थापनीयतया 'सम्प्रदायविदः' इत्यनेनास्वरसोदर्शितः (२) ।

---

(१) प्रतियोग्यनवच्छेदकयोर्देश-कालयोरेव तदभावावच्छेदकत्वनियमः, न तु देशकालादिभिन्नस्य प्रतियोग्यनवच्छेदकधर्म्मस्यापि तदभावावच्छेदकत्वनियम-इत्यर्थः ।

(२) 'सम्प्रदायविदः' इत्यनेनास्वरसोद्भावनं कृतमिति पा० ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अनुमानदीधितिः ।

नवीनास्तूत्पत्तिकालावच्छेदेन घटादौ गुणस्य प्रलयावच्छेदेन गगनादौ संयोगस्य सामान्याभावोवर्त्तते तथा धूमवत्यपि विरहो दहनस्य इह पर्व्वते नितम्बे हुताशनो न शिखरे इति प्रतीतेः संयोगेन द्रव्यस्याप्यव्याप्यवृत्तित्वात् वृत्तेरव्याप्यवृत्तित्वे वृत्तिमतो व्याप्यवृत्तित्वस्यात्यन्तमसम्भावितत्वाच्च । एवं प्रतियोगिमतोऽपि काल-देशयोर्देश-कालभेदावच्छेदेन तदभावः । तथाच तत्तत्साध्यकाव्याप्तिवारणाय तत्, नोपादेयञ्च सर्व्वथैव व्याप्यवृत्तिसाध्यके साध्यादिभेदेन (१) व्याप्तिभेदादिति वदन्ति ।

गादाधरी विवृतिः ।

'गुणस्य सामान्याभावोवर्त्तत इत्यन्वयः, ध्वंस-प्रागभावयोरत्यन्ताभावविरोधिताया निराकृतत्वादिति भावः । एतेन तदवच्छेदेन संयोगसामान्याभावोऽपि सुतरां वर्त्तते व्यापकधर्म्मावच्छिन्नाभाववति व्याप्यधर्म्मावच्छिन्नाभाववत्त्वनियमादिति सूचितम् । न चोत्पत्तिकालावच्छेदेन घटादौ गुणस्य प्रागभाव एव न तु तत्सामान्यात्यन्ताभावोऽपि मानाभावात् इति वाच्यम् । तदा

---

(१) साध्य-साधनभेदेनेति पाठः कुत्रचित् पुस्तके वर्त्तते परन्तु स पाठो न भट्टाचार्य्येणोद्धृतः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तत्र जन्यैकत्वहेतुभूतस्य (१) एकत्वत्वावच्छिन्नाभावस्यावश्यकतया तस्यैव स्वसमनियतगुणत्वाद्यवच्छिन्नाभावरूपतया विवादायोगात् । संयोगादिसाध्यकनित्यद्रव्यमात्रवृत्तिहेतुकस्थले व्यावृत्तिदानायाह, 'प्रलयेति, महाप्रलयस्य जन्यभावानधिकरणतया तदानीं संयोगाद्यसत्त्वादिति भावः। तदानीञ्च गगनादौ नित्यैकत्वपरिमाणादिसत्त्वेन गुणसामान्याभावासत्त्वात् संयोगस्यैवेत्येवमुक्तं, अत्र च प्रमाणं महाप्रलये गगने न संयोग इत्यादिप्रामाणिकव्यवहार एव, तादृशव्यवहारस्य ध्वंसावगाहित्वेऽतिप्रसङ्गात्, (२) व्यवहारानादरेऽतीन्द्रियगगनादौ गोत्वाद्यभावस्याप्रामाणिकत्वापत्तेः प्रत्यक्षासम्भवात् अनुमानस्याप्रयोजकत्वात्। वह्निमान् धूमादित्यादौ व्यावृत्तिदानायाह, 'तथेति, 'दहनस्य' दहनत्वावच्छिन्नस्य, 'प्रतीतिरित्यन्तं द्रव्यस्याव्याप्यवृत्तित्वादित्यत्र हेतुः, प्रत्यक्षप्रमाणमुक्त्वा युक्तिमप्याह, 'वृत्तेरिति संयोगरूपसम्बन्धस्येत्यर्थः, 'वृत्तिमतो व्याप्यवृत्तित्वस्य' संयुक्तस्य तेन सम्बन्धेन व्याप्यवृत्तितायाः, 'असम्भावितत्वादिति। अयमाशयः सम्बन्धिसत्तायाः सम्बन्धाधीनत्वाद्यदवच्छेदेन यदीययत्सम्बन्धो नास्ति तदवच्छेदेन तत्सम्बन्धावच्छिन्नतदभावसत्त्वमावश्यकं संयोगादेः सम्बन्धस्य समवायस्य व्याप्यवृत्तित्वेऽपि न संयोगादेर्व्याप्यवृत्तिता गुणादौ समवायसत्त्वेऽपि संयोगाद्यसत्त्ववत् संयोगाद्यनवच्छेदकावच्छिन्ने संयोगादिमति तत्समवायसत्त्वेऽपि तदभावसत्त्वोपपत्तेरिति ।

---

(१) एकत्वोत्पत्त्यनन्तरमेकत्वोत्पत्तिवारणाय एकत्वाभावस्य हेतुत्वमिति भावः ।

(२) इदानीं गगने न संयोग इत्यादिव्यवहारप्रसङ्गादित्यर्थः ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

केचित्तु वृत्तेरव्याप्यवृत्तित्वे वृत्तिमतोऽव्याप्यवृत्तित्ववत् वृत्तेर्व्याप्यवृत्तित्वे वृत्तिमतोव्याप्यवृत्तित्वं युक्तितौल्यादिति संयोगादिप्रतियोगिकत्वविशिष्टसमवायत्वेन समवायोपि न व्याप्यवृत्तिरित्याहुः।

वह्निमान् धूमादित्यादौ कालविशेषावच्छेदेन हेतुमति वर्त्तमानं साध्याभावमादाय घटत्ववान् कालत्वादित्यादौ पटाद्यवच्छेदेन काले वर्त्तमानं कालिकसम्बन्धावच्छिन्नाभावमादायाव्याप्तिदानायाह, 'एवमिति प्रतियोगिमतो देशस्य प्रतियोग्यनाधारकालावच्छेदेन प्रतियोगिमतः कालस्य च प्रतियोग्यनाधारदेशावच्छेदेनाभाववत्त्वमित्यर्थः, 'देशे कालस्येवेति, इदानीमत्र घटो नास्तीत्यादिप्रत्यये देशनिष्ठायाः कालावच्छिन्नाधारतायाः कालनिष्ठाया देशविशेषावच्छिन्नाधारताया वा विषयत्वमित्यत्र विनिगमनाविरहादुभयस्यैव विषयत्वादिति भावः। 'तत्तत्साध्यकेति गुणत्वाद्यवच्छिन्नसाध्यक-द्रव्यत्वाद्यव्याप्तिवारणायेत्यर्थः। 'तत्' असमानाधिकरणान्तम्। अव्याप्यवृत्तिसाध्यके प्रतियोगिवैयधिकरण्याघटितव्याप्तेरप्रसिद्ध्या तद्घटितैव व्याप्तिः व्याप्यवृत्तिसाध्यके तु प्रतियोगिवैयधिकरण्यानुपस्थितिदशायामपि हेतुसामानाधिकरणाभावप्रतियोगितावच्छेदकत्वसामान्याभावग्रहादनुमित्युत्पत्त्या प्रतियोगिवैयधिकरण्याघटितापि व्याप्तिरस्ति प्रतियोगिवैयधिकरण्यघटितव्याप्तिरुभयत्रैव प्रसिद्धानुमितिप्रयोजिका चेत्याशयेन मूलकृतस्तदनुपादानमित्याह, 'नोपादेयमिति, व्याप्यवृत्तिसाध्यके सार्व्वत्रिकमुपादानं प्रतिक्षिप्तं न त्वनुपादानस्य सार्व्वत्रिकत्व-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

मुक्तं, व्याप्यवृत्तेरपि साध्यस्याऽव्याप्यवृत्तित्वभ्रमदशायां प्रतियोगिवैयधिकरण्यघटितव्याप्तिज्ञानादेवानुमित्युपगमात्, व्याप्यवृत्तेरपि साध्यस्याव्याप्यवृत्तित्वभ्रमदशायां प्रतियोगिवैयधिकरण्यघटितव्याप्तिज्ञानादेवानुमित्युपगमेऽपि व्याप्यवृत्तिसाध्यके सर्व्वत्र तादृशविशेषणोपादानानियमः तदघटिताया अपि व्याप्तेः सर्व्वत्रानुमित्यौपयिकत्वात् अव्याप्यवृत्तिसाध्यके तु सर्व्वत्र तदुपादाननियम एव तदघटितव्याप्तेरप्रसिद्धेरिति वार्थः। व्याप्यवृत्तिसाध्यकत्वञ्च स्वसमानाधिकरणाभावाप्रतियोगिसाध्यकत्वं, सत्तावान् द्रव्यत्वात् कालिकसम्बन्धावच्छिन्नाकाशाभावाभाववान् आत्मत्वादित्यादिकञ्च न तथा,(१) साध्यवति(२) कालात्मादौ कालिक-दैशिकविशेषणताभ्यां साध्याभावसत्त्वात्, अतस्तत्र प्रतियोगिवैयधिकरण्याविशेषितहेतुमन्निष्ठाभावाप्रतियोगित्वस्य साध्येऽसत्त्वेन व्याप्तेः प्रतियोगिवैयधिकरण्यघटितत्वनियमेऽपि न दोष (३)।

केचित्तु व्याप्यवृत्तिसाध्यकत्वं यथाश्रुतमेव हेतुमत्यभावस्य दैशिकविशेषणतया वृत्तिर्व्विवक्षणीया अतो न हेतुमति कालादौ कालिकविशेषणतादिना साध्याभावसत्त्वेऽप्यव्याप्तिः भावस्याप्यभावत्वेन दैशिकविशेषणतया वृत्तिः प्रामाणिकी अतो नाभावसाध्यकव्यभिचारिण्यतिव्याप्तिः (४) यादृशप्रतियोगितानिरूपकाभावत्व-

---

(१) न व्याप्यवृत्तिसाध्यकमित्यर्थः।

(२) कुत इत्याकाङ्क्षायामाह, साध्यवतीति।

(३) प्रतियोगिवैयधिकरण्यघटितैव व्याप्तिरित्येवमपि न दोष इति पा०।

(४) दैशिकविशेषणतया सत्तारूपसाध्याभावाभावस्य वृत्तेरिति भावः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

विशिष्टस्य दैशिकविशेषणतया हेतुमति वृत्तिस्तादृशप्रतियोगितानवच्छेदकत्वविवक्षया कालिकसम्बन्धावच्छिन्नप्रतियोगिताकाकाशाभावाभाववान् इत्यादावव्याप्तेर्निरासः तत्र आकाशाभावस्याकाशाभावत्वेनैव दैशिकविशेषणतया आत्मनि वृत्तिर्न तूक्तसाध्यतावच्छेदकावच्छिन्नप्रतियोगिताकत्वेन, आत्मनि तादृशाभावाभावो नास्तीत्यप्रतीतेः, अव्याप्यवृत्तिसाध्यकेऽपि संयोगाभाववान्नित्यगुणत्वादित्यादौ(१) अनुमित्यौपयिकद्विविधव्याप्तेः सम्भवेन सर्व्वथैवेत्युक्तं तावता अव्याप्यवृत्तिसाध्यकेऽपि क्वचित्तदघटितव्याप्तिसम्भव इति सूचितमित्याहुः ।

यत्तु 'व्याप्यवृत्तिसाध्यके' अव्याप्यवृत्तित्वग्रहाविषयसाध्यके, सर्व्वथैवासमानाधिकरणान्तस्यानुपादेयतया तत्र लाघवेन प्रतियोग्यसामानाधिकरण्याघटितव्याप्तेरेवानुमानाङ्गतास्वीकारादिति व्याख्यानं, तदसत्, तत्रापि शब्दादिना प्रतियोग्यसामानाधिकरण्यघटितव्याप्तेर्यदा ग्रहस्तदा अनुमितेरुत्पादाय तादृशव्याप्तेरनुमानाङ्गत्वस्योपगन्तव्यत्वात्, अन्यथा यादृशव्यतिरेकिसाध्ये न केवलान्वयित्वभ्रमस्तादृशसाध्यके लाघवेन साध्याभाववदवृत्तित्वस्यैव व्याप्तित्वोपगमप्रसङ्गात् । केवलान्वयिनो यस्य साध्यस्य न व्यतिरेकित्वभ्रमविषयता तत्साध्यके हेतुसामानाधिकरण्यविशेषणपरित्यागस्यापि प्रसङ्गाच्च (२) ।

---

(१) संयोगाभाववान् द्रव्यत्वादित्यादौ प्रतियोगिवैयधिकरण्याघटितव्याप्तेरभिन्नरा तत्र तद्घटितव्याप्तिरपि हेतुरिति भावः ।

(२) अन्यथा यादृशव्यतिरेकिसाध्ये न केवलान्वयित्वभ्रमस्तत्र साध्याभाववद-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

यत्तु प्रतियोग्यसमानाधिकरणेत्यत्र प्रतियोगिपदं स्वप्रतियोगिपरमवश्यं वाच्यम्, अन्यथा प्रतियोगित्वस्य सामान्यरूपेण केवलान्वयितया प्रतियोग्यसमानाधिकरणाभावस्यैव दुर्लभत्वापत्तेः। तथाच स्वपदस्य तत्तदभावपरतया तत्तदभावप्रतियोग्यसामानाधिकरण्यविशिष्टत्वेन हेतुमद्वृत्तीनां तत्तदभावव्यक्तीनां प्रतियोगितावच्छेदकत्वाभावकूटज्ञानमनुमितिकारणं वाच्यम् तादृशञ्च ज्ञानमसर्व्वज्ञस्य दुर्घटं अतः प्रतियोगिपदस्य प्रकृतसाध्यार्थकतया साध्याभावनिष्ठसाध्यसामानाधिकरण्याभावविशिष्टः सन् हेतुमद्वृत्तिरभाव एवानुगतरूपेण निवेश्यः, सद्धेतौ सर्व्वेषामेव हेतुसमानाधिकरणाभावानां सर्व्वत्र हेत्वधिकरणे साध्यसमानाधिकरणतया साध्यसामानाधिकरण्याभावविशिष्टस्य हेतुमद्वृत्तित्वं न प्रसिध्यतीति साध्याभावनिष्ठं साध्यसामानाधिकरण्यविशेषणं (१) तथा सति सद्धेतौ साध्याभावातिरिक्ताभावे तत्प्रसिद्धिसम्भवात्। व्यभिचारिणि च (२) व्यभिचारनिरूपकाधिकरण एव साध्याभावे साध्यसामानाधिकरण्याभावविशिष्टतया हेतुमद्वृत्तित्वमिति साध्याभावस्यापि लक्षणघटकतया नातिव्याप्तिः, संयोगेन प्रमेयसामान्यसाध्यकसद्धेतौ साध्याभावातिरिक्ताभावाप्रसिद्ध्या हेतुमति साध्याभावनिष्ठसाध्यसामानाधिकरण्याभावविशिष्टाभावाप्रसिद्धि---

---

वृत्तित्वस्यैवानुमानाङ्गता न तु व्यापकसामानाधिकरण्यस्य गुरुशरीरस्येत्यपि स्यात्, एकसाध्यके यादृशव्याप्तिग्रहादनुमितिरन्यत्रापि तज्ज्ञानादनुमितेरानुभविकतया नापह्नवमर्हतीति चेत्, तुल्यं प्रकृतेऽपीति पा०।

(१) साध्याभावनिष्ठसाध्यसामानाधिकरण्यस्याभावो निवेश्य इति पा०।

(२) संयोगी सत्त्वादित्यादौ चेत्यर्थः।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

रिति साध्यतावच्छेदकावच्छिन्नाभावनिष्ठसाध्यसामानाधिकरण्यस्याभावो निवेश्यः। एवञ्च व्याप्यवृत्तिसाध्यके साध्यतावच्छेदकावच्छिन्नसाध्याभावनिष्ठसाध्यसामानाधिकरण्याप्रसिद्धया तादृश-व्याप्तिर्न प्रसिद्धयतीति तत्साध्यके प्रतियोग्यसामानाधिकरण्याघटितैव व्याप्तिरित्युक्तं 'नोपादेयञ्चेत्यादिना, तदपि न, साध्यतावच्छेदकावच्छिन्नसामानाधिकरण्यविशिषणीभूतसाध्याभावे साध्यतावच्छेदकसम्बन्धावच्छिन्नप्रतियोगिताकत्वनिवेशनप्रयोजनाभावात् व्याप्यवृत्तिसाध्यकेऽपि सम्बन्धान्तरावच्छिन्नसाध्याभावे साध्यसामानाधिकरण्यप्रसिद्धया तत्राप्युक्तव्याप्तिप्रसिद्धेः (१)।

व्याप्यवृत्तिसाध्यकस्थले व्याप्तिर्द्विविधा न त्वव्याप्यवृत्तिसाध्यके इति साध्यादिभेदेन व्याप्तिभेदाभावे न सम्भवतीत्यत आह, 'साध्यादिभेदेनेति साध्यतावच्छेदकादेर्विशिष्य व्याप्तिघटकतया तद्भेदेन तद्भेदस्यावश्यकत्वादित्यर्थः।

अनुमानदीधितिः।

प्रतियोग्यसामानाधिकरण्यञ्च प्रतियोगितावच्छेदकावच्छिन्नासामानाधिकरण्यं तेन अयं गुण-कर्म्मान्यत्वविशिष्टसत्तावान् जातेः भूतत्व-मूर्त्तत्वोभयवान् मूर्त्तत्वादित्यादौ नातिप्रसङ्गः। न चोभयत्वमेकविशिष्टापरत्वं विशिष्टञ्च केवलादन्यदिति तदभावो मनसि

---

(१) तत्राप्युक्तव्याप्त्यप्रसिद्धेरिति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

सहजत एव प्रतियोगिव्यधिकरण इति वाच्यम्, उभयत्वं हि न विशिष्टत्वादनतिरिक्तं न वा तदवच्छिन्नाभावस्तदवच्छिन्नाभावात् वैशिष्ट्यविरहेऽपि घटत्वपटत्वयोरुभयत्वस्योभयत्वेन तदभावस्य च प्रत्यक्षसिद्धत्वात्। न च तत्र व्याप्तिरेवोभयत्वाधिकरणस्य मूर्त्तत्वस्य मनसि सत्त्वादिति वाच्यम्। तथात्वेऽप्युभयत्वेन रूपेण तत्रासत्त्वात् नात्रोभयमिति प्रतीतेर्दुर्व्वारत्वात्।

गादाधरी विवृतिः ।

यद्यपि जात्यादौ गुण कर्म्मान्यत्वसामानाधिकरण्योपलक्षितस्य सत्तादेर्व्याप्तिरस्त्येव गुणादौ तदुपलक्षितसत्ताद्यनुमितेः प्रमात्वात्, तथापि गुणादौ विशिष्टसत्तादिप्रतियोगिकवैशिष्ट्यावगाह्यनुमितेर्भ्रमत्वात्(१) तत्र तादृशानुमित्यौपयिकव्याप्तिस्वीकारे सल्लिङ्गकपरामर्शादपि भ्रमः स्यादिति तादृशानुमित्यौपयिकव्याप्तिर्गुणादिवृत्तिहेतौ न स्वीकर्त्तुं शक्यते अतः साध्यतावच्छेदकविशिष्टवैशिष्ट्यविषयकानुमित्यौपयिकव्याप्तिशरीरे प्रतियोगितावच्छेदकविशिष्टवैयधिकरण्यपर्य्यन्तं निवेश्य तत्र तादृशव्याप्तिं वारयति, 'प्रतियोग्यसामानाधिकरण्यमिति। न च तत्रापि व्याप्तिस्वीकारे क्षतिविरहः गुणो

---

(१) 'भ्रमत्वात्' इत्यनन्तरं 'न च तत्रापि व्याप्तिस्वीकार इति सन्दर्भात् पूर्व्वं 'तादृशानुमित्यौपयिकव्याप्तिर्गुणादिवृत्तिहेतौ न स्वीकर्त्तुं शक्यते इति गुणादिनिष्ठविशिष्टसत्ताद्यभावस्य अभावान्तेनोपादाननिर्व्वाहाय प्रतियोगिपदं प्रतियोगितावच्छेदकविशिष्टपरतया व्याचष्टे, 'प्रतियोगीतीतिपाठः कुत्रचिदादर्शपुस्तके वर्त्तते।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

गुणान्यत्वविशिष्टसत्तावान् जातेरित्यादौ बाधेनैव हेतोर्दुष्टत्वोपपत्तेः। द्रव्यपञ्चक-तादृशसाध्यक-जात्यादिहेतोश्च समीचीनताया एवोपगमात् बाधानतारदशायां गुणादौ जात्यादिलिङ्गकविशिष्टसत्तावैशिष्ट्यानुमितिर्भ्रमरूपा प्रमात्मकपरामर्शादपि (१) स्वीक्रियत एव गन्धप्रागभावावच्छिन्नो घटो गन्धवान् पृथिवीत्वादित्यादौ बाधानतारदशायां प्रमात्मकपरामर्शात् विशिष्टानुयोगिकवैशिष्ट्यावगाहिन्या भ्रमानुमितेर्मणिकारानुमतत्वमिति वाच्यम्। भ्रमानुमितिजनकपरामर्शस्य भ्रमत्वसम्भवे तदुपादानमावश्यकमित्याशयात् गन्धप्रागभावावच्छिन्नो घटो गन्धवान् पृथिवीत्वादित्यादौ परामर्शस्य कथञ्चिदपि भ्रमत्वासम्भवेनागत्या प्रमापरामर्शाद्भ्रमानुमितिस्वीकारात् गुणो विशिष्टसत्तावान् जातिमत्त्वादित्यादिविशिष्टप्रतियोगिकवैशिष्ट्यविषयकानुमितिस्थलमुपेक्ष्य गन्धप्रागभाववान् घटो गन्धवान् पृथिवीत्वादित्यादिविशिष्टानुयोगिकवैशिष्ट्यविषयकानुमितिस्थलमसिद्धि–व्यभिचारासङ्कीर्णबाधोदाहरणत्वेनाभिहितवतो मणिकृतोप्युक्तस्थले व्याप्तिर्नास्तीत्याशय उन्नीयते। अथ विशिष्टनिरूपित एव समवायादिर्विशेष्याविरोधिनो विशिष्टाभावस्य प्रतियोगितावच्छेदकसम्बन्धः शुद्धसमवायादेस्तथात्वे दण्डाद्युपलक्षितपुरुषादिमत्त्वविरोधितादृशपुरुषाद्यभावात् तदविरोधिविशिष्टपुरुषाद्यभाववैलक्षण्यानिर्व्वाहात्। न च तदुपलक्षितपुरुषाद्यभावस्य स धर्म्मो न प्रतियोगितावच्छेदकः अपि तु प्रतियोगितासमानाधिकरण एव प्रतियोगितावच्छेदकस्यैव प्रति-

(१) सल्लिङ्गकपरामर्शादपीति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

योगिनि विशेषणत्वात् अताद्दशस्यैव चोपलक्षणत्वात् इति ताद्दशाभावयोर्विशेष इति वाच्यम् । उपलक्षणेन दण्डादिना व्यावृत्तप्रतियोगिनिष्ठप्रतियोगितायां पुरुषत्वादेरतिप्रसक्ततया तन्मात्रे तदवच्छेदकतायाः पर्य्याप्त्यसम्भवेन दण्डादेरपि तदवच्छेदककोटाववश्यमन्तर्भावात् । अतएव पुरुषादिमात्रेण न दण्डाद्युपलक्षितपुरुषाद्यभावस्य विरोधः तदवच्छिन्नाभावस्यैव तद्विशिष्टाभावत्वे सत्तान्यपृथिवीसमवेतशून्यं वायुत्वादित्यादौ ग्रन्थकृतां कूटघटितलक्षणातिव्याप्तिदानमपि विरुध्येत पृथिवीसमवेतत्वविशिष्टाभावस्य वाय्वादौ सत्त्वेन वायुत्वादेस्तत्र साध्ये सद्धेतुत्वादिति चेन्न; विशिष्टनिरूपितसम्बन्धस्य विशिष्टाभावप्रतियोगितावच्छेदकत्वं सर्व्वत्र न सम्भवतीति प्रागुक्तत्वात्, अगत्या विशिष्टाभावप्रतियोगिता विशेषणान्तर्भावेन पर्य्याप्ता उपलक्षिताभावप्रतियोगिता तु दण्डादिरूपावच्छेदकोपलक्षितविशेष्य एव पर्य्याप्ता इत्युपगम्य तयोर्विशेषस्य उपपादनीयत्वात् । विशिष्टस्यातिरिक्ततामते विशिष्टसत्ताभावः सहजत एव प्रतियोग्यसमानाधिकरण इत्युभयसाध्यकानुसरणं, 'नातिप्रसङ्ग इति हेतुमति विशिष्टाभावादेः शुद्धप्रतियोगिसामानाधिकरण्यसत्त्वेऽपि विशिष्टप्रतियोगिसामानाधिकरण्यविरहात् न भ्रमानुमितिजनकपरामर्शस्य प्रमात्वप्रसङ्ग इत्यर्थः । व्याप्यवृत्तिसाध्यकेऽपि प्रतियोगिवैयधिकरण्यावगाहिपरामर्शस्यानुमितिहेतुतया उक्तसाध्यस्य व्याप्यवृत्तित्वेऽपि नातिप्रसङ्गाप्रसक्तिः । ननु मूर्त्तत्वादिहेतौ भूतत्वादिविशिष्टमूर्त्तत्वत्वादिरूपतदुभयत्वावच्छिन्नस्यैव न व्याप्तिः, न तु तदुभयवृत्तिबुद्धिविशेषविषयत्वरूप-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

तदुभयत्वावच्छिन्नस्य तथाच विशिष्टसत्तादिसाध्यकजात्यादिहेताविव उक्तोभयसाध्यकमूर्त्तत्वादिहेतावपि यथाश्रुतप्रतियोग्यसामानाधिकरण्यनिवेशपक्षेऽपि नातिप्रसक्तिरित्यभिमानं 'न चेत्यादिना निराकरोति, 'सहजत एव' प्रतियोगिपदस्य तत्त्वावच्छेदकविशिष्टपरतां विनैव, 'उभयत्वं' उभयव्यवहारविषयतावच्छेदकं, 'न विशिष्टत्वात्' एकविशिष्टापरत्वात्, 'अनतिरिक्तं' अभिन्नं, अतिरिक्तमित्यनुक्त्वा 'नानतिरिक्तमित्यभिधानं उभयपदार्थतावच्छेदकावच्छेदेनातिरिक्तत्वलाभाय, नञ्पदस्यानुयोगितावच्छेदकावच्छेदेन अभावबोधकत्वव्युत्पत्तेः, तावता एकविशिष्टापरत्वमुभयनिष्ठव्यासज्यवृत्तिधर्म्मश्च उभयपदार्थतावच्छेदकमस्तु (१) प्रकृते चोभयत्वमेकविशिष्टापरत्वमेवेतिशङ्काव्युदासः। अत्र हेतुः 'वैशिष्ट्यविरहेऽपि घटत्व-पटत्वयोरुभयत्वस्य प्रत्यक्षसिद्धत्वादिति घटत्व-पटत्वयोः सामानाधिकरण्यविरहेऽपि तत्र उभयव्यवहारविषयतावच्छेदकस्य प्रत्यक्षसिद्धत्वादित्यर्थः, अन्यथा तत्रोभयव्यवहारानुपपत्तेरिति भावः। यद्यपि घटत्व-पटत्वोभयमितिप्रतीतौ कालिकसम्बन्धघटितसामानाधिकरण्यरूपवैशिष्ट्यस्य विषयतासम्भवः तथापि वाच्यत्व-घटत्वोभयं समवेतमित्यादिप्रतीतिव्यवहारविरहेण उभयं समवेतमिति प्रतीति-व्यवहारयोः समवायिसमवेतत्वरूपवैशिष्ट्यविषयताया अभ्युपगन्तव्यतया घटत्व-पटत्वोभयं समवेतमित्यादौ तादृशवैशिष्ट्याप्रसिद्धा व्यासज्यवृत्तिधर्म्म एव विषय-

(१) अस्त्वित्यनन्तरं 'न तु तन्मात्रं वक्ष्यमाणानुपपत्तेः' इत्यतिरिक्तपाठः कस्मिंश्चिदादर्शपुस्तके वर्त्तते।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

इति भावः। तथाच तदनुरोधेन व्यासज्यवृत्तिधर्म्मविशिष्टस्य उभय-व्यवहारविषयताया आवश्यकत्वे एकविशिष्टापरत्वस्य तद्व्यवहार-विषयत्वमप्रामाणिकमिति न भूतत्व-मूर्त्तत्वोभयवान् मूर्त्तत्वादि-त्यादावेकविशिष्टापरत्वस्य साध्यतावच्छेदकत्वप्रसक्तिः तथा सति अनुमितेरुभयवानित्याकारकतानुपपत्तेरिति निर्व्यूढम्। ननु मूर्त्त-त्वाधिकरणे मनसि भूतत्व-मूर्त्तत्वोभयं नास्तीति बुद्धेरेक-विशिष्टापराभावावलम्बनेनैव मनसि प्रतियोगिसत्त्वेन उभयवृत्ति-धर्म्मावच्छिन्नाभावासत्त्वादिति क्वचिदेकविशिष्टापरत्वस्याप्युभय-व्यवहारविषयतावच्छेदकत्वमावश्यकमित्यत आह, 'न वेति, 'तद-वच्छिन्नाभावः' उभयव्यवहारविषयतावच्छेदकावच्छिन्नाभावः, (१) 'तदवच्छिन्नाभावात्' एकशिष्टापरत्वावच्छिन्नाभावात्, नानतिरिक्त-इति विपरिणतेनान्वयः,(२) प्रतियोगितावच्छेदकविशिष्टेनैव प्रति-योगिना अभावस्य विरोधादेकस्याधिकरणेऽपि व्यासज्यवृत्ति-धर्म्मावच्छिन्नाभावसत्त्वे बाधकाभावादिति भावः। एतेन मूर्त्तत्वस्य व्यासज्यवृत्त्युभयत्वावच्छिन्नव्यभिचारितापि व्यवस्थापिता, आव-श्यकश्च एकाधिकरणे व्यासज्यवृत्तिधर्म्मावच्छिन्नतदभावः अन्यथा घटादौ समवायेन घटत्व-पटत्वोभयं नास्तीति प्रतीतेरनुपपत्ते-स्तत्र समवायिसमवेतत्वरूपवैशिष्ट्यावच्छिन्नाभावस्यैव विषयतायाः स्वीकरणीयत्वादन्यथा एककालीनत्वादिरूपघटत्वादिवैशिष्ट्याव-

---

(१) प्रत्येकाधिकरणवृत्तिरपि उभयव्यवहारविषयतावच्छेदकावच्छिन्नाभाव-इति पा०।

(२) विपरिणतेन सम्बन्धः, विपरीतेन सम्बन्ध इति पा०।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

च्छिन्नस्य पटत्वादेः समवायेन पटादौ सत्त्वेन तादृशप्रतीत्य-निर्व्वाहात् इत्याह, 'वैशिष्ट्यविरहेऽपि घटत्व-पटत्वोभयत्वेनाभावस्य प्रत्यक्षसिद्धत्वादिति । ननु तथापि व्यासज्यवृत्तिनिरुक्तोभयत्वेन साध्यत्वे मूर्त्तत्वस्य व्यभिचारिता सम्भवति एकप्रतियोगिमत्यपि उभयाभावस्य प्रतियोगिसमानाधिकरणतया मूर्त्तत्वाधिकरणे मनसि उभयाभावस्य प्रतियोगिव्यधिकरणत्वाभावात् हेतुमति प्रति-योगिव्यधिकरणस्यैव च साध्याभावस्य व्यभिचारत्वात् व्यभिचार-लक्षणेऽपि प्रतियोगितावच्छेदकावच्छिन्नवैयधिकरण्यपर्य्यन्तानिवे-शादित्याशङ्कां निरस्यति, 'न च तत्रेत्यादिना, 'व्याप्तिरेव' व्याप्ति-रिष्टैव, 'तथात्वेऽपीति मूर्त्तत्वस्य मनसि सत्त्वेऽपीत्यर्थः,'उभयत्वेनेति उभयत्वविशिष्टवत्तताया मनस्यसत्त्वादित्यर्थः, तथाच तत्र उभयत्व-विशिष्टवैशिष्ट्यानुमितेर्भ्रमतया तत्प्रयोजकहेतोर्न सद्धेतुत्वस्वीका-रसम्भवः । अतएव व्यभिचारलक्षणेऽपि प्रतियोगितावच्छेदकाव-च्छिन्नवैयधिकरण्यपर्य्यन्तमेव निवेश्यमिति भावः । एकाधिकरणे उभयत्वविशिष्टाभावसत्त्वे मानमाह, 'नात्रोभयमिति, अत्रोभय-मितिप्रतीत्यभावो न हेतुतयोक्तः तदुभयत्वेनैकस्य सत्त्वोपगमेऽपि उभयत्राधिकरणवृत्तितायास्तादृशप्रतीतिविषयतया एकस्मिन्नधि-करणवृत्तित्वाभावे तादृशप्रतीतेर्भ्रमत्वस्यावश्यकत्वात् तादृशप्रमा-विरहोपपत्तेः ।

अनुमानदीधितिः ।

अत्यन्तपदस्यात्यन्ताभावत्वनिरूपकप्रतियोग्यसामा-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

नाधिकरण्यस्य अत्यन्ताभावत्वनिरूपकप्रतियोगितायाश्च लाभाय अन्यथा सर्व्वस्यैवाभावस्य स्वसमानाधिकरणाभावान्तरभिन्नत्वात्तद्भेदस्य स्वरूपानतिरिक्तत्वात् प्रतियोग्यसामानाधिकरण्यस्यैव दुर्ल्लभत्वापत्तेः सर्व्वेषामेवाभावानां हेतुसमानाधिकरणात्यन्ताभावत्वनिरूपकप्रतियोग्यसमानाधिकरणाभावान्तरात्मकस्य स्वभेदस्य प्रतियोगित्वादभावसाध्यकाव्याप्तेश्चेति सम्प्रदायविदः ।

गादाधरी विवृतिः ।

ननु प्रतियोग्यसमानाधिकरण्यस्याभावविशेषणत्वे लक्षणेऽत्यन्तपदवैयर्थ्यं धूमाद्यधिकरणनिष्ठवह्न्यादिभेदस्य प्रतियोगिसमानाधिकरत्वेनैव साध्यतावच्छेदकस्य तत्प्रतियोगितावच्छेदकताया अकिञ्चित्करत्वादित्याशङ्कया साम्प्रदायिकोपदर्शितमत्यन्तपदप्रयोजनमाह, 'अत्यन्तपदञ्चेति, 'अत्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यस्येति, 'लाभायेत्यग्रिमेण सम्बन्धः, स्वं यस्य प्रतियोगिनोऽत्यन्ताभावस्तादृशप्रतियोग्यसामानाधिकरण्यपर्य्यन्तस्याभावविशेषणत्वलाभायेत्यर्थः. 'अत्यन्ताभावत्वनिरूपकप्रतियोगिताया इति प्रतियोगितानवच्छेदकेत्यत्र या प्रतियोगिता निविष्टा तत्रात्यन्ताभावत्वरूपानुयोगितानिरूपकत्वविशेषणस्य च लाभायेत्यर्थः । क्रमेण व्यावृत्तिमाह, 'अन्यथेति,

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

'सर्व्वस्यैभावस्येति हेतुसमानाधिकरणाभावत्वेनोपादेयस्य सर्व्वस्य गोत्वाद्यभावस्येत्यर्थः, 'स्वसमानाधिकरणाभावान्तरभिन्नत्वात्' स्वं यस्य समानाधिकरणं तादृशघटत्वाद्यभावभेदवत्त्वादित्यर्थः, 'स्वरूपानतिरिक्तत्वात्' गोत्वाद्यभावरूपाधिकरणस्वरूपत्वात्, अभावाधिकरणकाभावप्रतियोगिकाभावस्याधिकरणभूताभावरूपतेति सिद्धान्तादितिभावः। 'प्रतियोग्यसमानाधिकरणाभावस्य दुर्लभत्वापत्तेरिति गोत्वाद्यभावानामत्यन्ताभावत्वनिरूपकगोत्वादिरूपप्रतियोग्यसमानाधिकरणत्वेऽपि स्वनिष्ठभेदत्वनिरूपकघटत्वाद्यभावरूपप्रतियोगिसमानाधिकरणत्वनियमादिति भावः। न च भावस्वरूपस्यैवाभावस्य तादृशत्वं सुलभमितिवाच्यम्। तस्यापि स्वसमानाधिकरणभेदभिन्नत्वेन तद्दोषतादवस्थ्यात्, भेदभेदस्यानवस्थाभयेनाधिकरणस्वरूपताङ्गीकारात् (१)। प्रतियोग्यसामानाधिकरण्ये सम्बन्धविशेषानिवेशे सर्व्वत्रैव तादृशाभावाप्रसिद्धेः प्रतियोगितावच्छेदकसम्बन्धस्य साध्यतावच्छेदकसम्बन्धस्य वा तत्र निवेशे विशेषणताविशेषसम्बन्धेन यत्र साध्यता तत्र तदप्रसिद्धिर्द्रष्टव्या (२)

---

(१) 'न चेत्यादिरङ्गीकारादित्यन्तः पाठोवहुषु आदर्शपुस्तकेषु नास्ति।

(२) प्रतियोगितावच्छेदकसम्बन्धेन प्रतियोग्यसामानाधिकरण्यनिवेशे सर्व्वत्र न तादृशाभावाप्रसिद्धिः किन्तु विशेषणताविशेषेण साध्यकस्थले, तन्मते अभावे साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वस्य निवेशनीयत्वात् साध्यतावच्छेदकसम्बन्धस्य तत्र निवेशे विशेषणताविशेषसम्बन्धेन यत्र साध्यता तत्र तदप्रसिद्धिर्द्रष्टव्येति पा०। तदप्रसिद्धिर्द्रष्टव्या इत्यनन्तरम् अत्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यनिवेशेऽपि इति सन्दर्भात् पूर्व्वं 'प्रतियोगितानवच्छेदकेत्यत्र प्रतियोगितायाम् अत्यन्ताभावत्वनिरूपकत्वविवक्षाप्रयोजनमाह, 'हेतुसमानाधिकरणेति, तथाच

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अत्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यनिवेशेऽपि सर्व्वेषामेवाभावानाम् किञ्चिद्विशिष्ट(१)स्वाभावादिरूपप्रतियोगिसामानाधिकरण्यनियमात्तदसमानाधिकरणाप्रसिद्धिः यादृशप्रतियोगीत्यादिना वक्ष्यमाणरीतिरनुसरणे तु प्रतियोगिन्यत्यन्ताभावत्वनिवेशवैयर्थ्यमत्रास्वरसवीजमेव । 'हेतुसमानाधिकरणेति हेतुसमानाधिकरणो योऽत्यन्ताभावत्वनिरूपकप्रतियोग्यसामानाधिकरण्यवान् गोत्वाभावादिर्घटत्वाभावादिरूपसाध्यस्य तन्निष्ठघटत्वाभावभेदात्मकस्य तस्य प्रतियोगित्वादित्यर्थः, 'अभावसाध्यकेति घटत्वाभावादिसाध्यकपटत्वादिसाधनेत्यर्थः । अत्यन्ताभावत्वनिरूपकप्रतियोगितानिवेशेऽपि सम्बन्धान्तरावच्छिन्नसाध्यात्यन्ताभावप्रतियोगितावारणाय साध्यतावच्छेदकसम्बन्धावच्छिन्नत्वविशेषणध्रौव्ये एतद्विशेषणमनर्थकं साध्यतावच्छेदकसम्बन्धेन प्रतियोग्यसामानाधिकरण्यं निवेश्य सम्बन्धान्तरावच्छिन्नाभाववारणेऽपि सर्व्वेष्वेवाभावेषु उक्तरीत्या अत्यन्ताभावत्वनिरूपकप्रतियोगिसामानाधिकरण्यस्यापि सत्त्वेन साध्यतावच्छेदकसम्बन्धेन प्रकृतप्रतियोगितावदसामानाधिकरण्यस्यैवाभावे निवेशनीयतया साध्यनिष्ठप्रतियोगिताश्रयासामानाधिकरण्यस्य सद्धेत्वधिकरणवृत्तित्वविशिष्टाभावेऽसत्त्वेनाव्याप्त्यप्रसक्तिरित्यस्वरसवीजम् ।

घटभिन्नं पटत्वादित्यादौ अत्यन्ताभावत्वनिरूपकप्रतियोग्यसमानाधिकरणजलत्वाद्यभावादौ घटभेदभेदस्य सत्त्वात् तस्याधिकरणस्वरूपत्वात् तत्प्रतियोगितावच्छेदकत्वं तादृशभेदत्वेऽस्तीत्यव्याप्तिः इत्यधिकः पाठः कुत्रचिदादर्शपुस्तके वर्त्तत इति ।

(१) पूर्व्वक्षणादिविशिष्टेति पा॰ ।

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

अनुमानदीधितिः ।

अथ यदा गोत्वं तदा गौरित्यत्रातिव्याप्तिः प्रलयस्य गोध्वंसवत्त्वेन गवात्यन्ताभावानधिकरणत्वात् संसर्गाभावमात्रोक्तावपि यदा स्पन्दस्तदा द्व्यणुकं यदा अदृष्टं तदा जन्यं ज्ञानं दुःखं वा यदा तस्यादृष्टं तदा तदीयं ज्ञानमित्यादावतिव्याप्तिः द्व्यणुकत्वादेर्द्व्यणुकादिशून्यखण्डप्रलयादिनिष्ठध्वंस-प्रागभावप्रतियोगितानवच्छेदकत्वात् न हि तयोः सामान्याभावत्ववादिमतेऽपि एकविशेषप्रागभावविशेषान्तरध्वंसवत्यपि समये सामान्यावच्छिन्नध्वंस-प्रागभावयोः सम्भव इति चेन्न, प्रतियोगिमत इव ध्वंसादिमतोऽपि कालस्यात्यन्ताभाववत्त्वेऽविरोधात् अन्यथा अत्यन्ताभावस्य कालमात्रावृत्तित्वप्रसङ्गात् । इयांस्तु विशेषो यदेकस्य देशभेदावच्छिन्नं तथात्वमपरस्य तु स्वरूपावच्छिन्नमिति देशे कालस्येव कालेऽपि देशस्यावच्छेदकत्वात् तच्छून्ये च काले तदभावस्य प्रतियोगिव्यधिकरणत्वात् ।

गादाधरी विवृतिः ।

सम्प्रदायानुमतात्यन्ताभावत्वनिरूपकप्रतियोगितानिवेशपक्षेऽतिव्याप्तिमाशङ्कते, 'अथेत्यादिना, 'यदा गोत्वमिति, कालिकसम्ब-

CC-0. Agamnigam Digital Presevation Foundation, Chandigarh

*Nirukta, (2nd Edition) Vol. I. Fasc. 1 @ Rs. 1-4	Rs. 1	4
*Nyāyavārtika, Fasc. 2--6 @ /10/ each	3	2
Nityācārapaddhatiḥ, Fasc. 1-7 @ /10/ each	4	6
Nityācārapradīpa Vol. I, Fasc. 1--8 ; Vol. II, Fasc. 1-4. @ /10/ each	7	8
Nyayabindutikā, Fasc. 1 @ /10/ each	0	10
*Nyāya Kusumāñjali Prakaraṇa Vol. II, Fasc. 1--3 @ /10/ each	1	14
Nyaya Vartika Tatparya Parisudhi, Fasc. 1-2 @ /10/ each	1	4
Nyayasarah	2	0
Padumawati, Fasc. 1--6 @ 2/ each	10	0
Prākrita-Paingalam, Fasc. 1--7 @ /10/ each	4	6
Parāçara Smṛti, Vol. I, Fasc. 2-8; Vol. II, Fasc. 1--6 ; Vol III, Fasc. 1--6 @ /10/ each	11	14
Parāçara, Institutes of (English) @ 1/- each	1	0
Pariksamukha Sutram	1	0
Prabandhacintāmaṇi (English) Fasc. 1--3 @ 1/4/ each	3	12
Rasarnavam, Fasc. 1-3	3	12
Ravisiddhanta Manjari, Fasc. 1	0	10
Saddarsana-Samuccaya, Fasc. 1-2 @ /10/ each	1	4
Samaraicca Kaha Fasc. 1-5, @ /10/ each	3	2
Sāṅkhya Sūtra Vṛtti, Fasc. 1-4 @ /10/ each	2	8
Ditto (English) Fasc. 1-3 @ 1/- each	3	0
Six Buddhist Nyaya Tracts.	0	10
Srāddha Kriyā Kaumudī, Fasc. 1-6 @ /10/ each	3	12
Suçruta Saṁhitá, (Eng.) Fasc. 1 @ 1/- each	1	0
Suddhikaumudī, Fasc. 1-4 @ /10/ each	2	8
Sundaranandam Kavyam	1	0
Suryya Siddhanta Fasc. 1-2 @ 1-4 each	2	8
Syainika Sastra	1	0
*Taittreya Brahmana, Fasc. 11-25 @ /10/ each	9	6
*Taitterīya Saṁhitā, Fasc. 27-45 @ /10/ each	11	14
Tāṇḍya Brāhmaṇa, Fasc. 10-19 @ /10/ each	6	4
Tantra Vārteka (English) Fasc. 1-10 @ 1/4/ each	12	8
*Tattva Cintāmaṇi, Vol. I, Fasc. 1-9, Vol. II, Fasc. 2-10, Vol. III, Fasc. 1-2, Vol. IV, Fasc. 1, Vol. V, Fasc. 1-5, Part IV, Vol. II, Fasc. 1-12 @ /10/ each	23	12
Tattva Cintamani Didhiti Vivriti, Vol. I, Fasc, 1-6; Vol. I', Fc, 1, @ /10/ each	4	6
Tattva Cintamani Didhiti Prakas, Fasc. 1-5, @ /10/ each	3	2
Tattvārthadhigama Sutram, Fasc. 1-3 @ /10/ each	1	14
Tirthacintamoni, Fasc, 1-3, @ /10/ each	1	14
Trikāṇḍa-Maṇḍanam, Fasc. 1-3 @ /10/ each	1	14
Tul'si Satsai, Fasc. 1--5 @ /10/ each	3	2
*Upamita-bhava-prapañca-kathā, Fasc. 1-2, 5-13 @ /10/ each	6	14
Uvāsagadasāo, (Text and English) Fasc. 1--6 @ 1/- each	6	0
Vallāla Carita, Fasc 1 @ /10/	0	10
Varṣa Kriyā Kaumudī, Fasc 1--6 @ /10/ each	3	12
*Vāyu Purāṇa, Vol. I, Fasc. 3--6 ; Vol. II, Fasc. 1--7, @ /10/ each	6	14
Vidhāna Pārijata, Fasc. 1-8 Vol- II. Fasc. I @ /10/ each	5	10
Ditto Vol. II, Fasc. 2-5 @ 1/4/	5	0
Vivādaratnākara, Fasc 1--7 @ /10/ each	4	6
Vṛhat Svayambhū Purāṇa, Fasc. 1--6 @ /10/ each	3	12
Yogasāstra Fasc. 1-3	3	12
Tibetan Series.		
Amarkosha	2	0
Baudhastotrasangraha, Vol. I	2	0
A Lower Ladakhi version of Kesarsaga, Fasc. 1--4 @ 1/- each	4	0
Nyayabindu of Dharmakirti, Fasc. 1	1	0
Pag-Sam S'hi Tiṅ, Fasc. 1--4 @ 1/- each	4	0
Rtogs *brjod dpag bkhri* S'iṅ (Tib. & Sans. Avadāna Kalpalatā Vol. I, Fasc. 1--10 ; Vol. II. Fasc. 1--10 @ 1/- each	20	0
Sher-Phyin, Vol. I, Fasc. 1-5 ; Vol. II, Fasc. 1-3 ; Vol. III, Fasc 1-6, @ 1/ each	14	0
Arabic and Persian Series.		
Āmal-i-Salih, or Shan Jahan Namah	2	0
Al-Muqaddasi (English) Vol. I, Fasc. 1--4 @ 1/- each	4	0
Āin-i-Akbarī, Fasc. 1-22 @ 1/8/ each	33	0
Ditto (English) Vol. II, Fasc. 1-5 Vol. III, Fasc. 1-5, Index to Vol. II, @ 2/- each	22	0
Akbarnāmah, with Index, Fasc. 1--37 @ 1/8/ each	55	8
Akbarnāmah, English Vol. I, Fasc. 1--8 ; Vol. II, Fasc. 1--7, Vol. III, Fasc. 1--2 @ 1/4/ each	21	4
Arabic Bibliography, by Dr. A. Sprenger, @ /10/	0	10
Conquest of Syria, Fasc. 1-9 @ /10/ each	5	10
Catalogue of Arabic Books and Manuscripts, 1-2 @ 1/- each	2	0

*The other Fasciculi of these works are out of stock and complete copies cannot be supplied.

CC-0. Agamnigam Digital Preservation Foundation, Chandigarh

		Rs.	
Catalogue of the Persian Books and Manuscripts in the Library of the Asiatic Society of Bengal. Fasc. 1-3 @ 1/ each ...	Rs.	3	0
Dictionary of Arabic Technical Terms, and Appendix, Fasc. 1-21 @ 1/8/ each		31	8
Faras Nama, of Hashini ...		1	0
Ditto of Zabardast Khan ...		1	0
Farnang-i-Rashīdī, Fasc. 1-14 @ 1/8/ each ...		21	0
Fihrist-i-Ṭūsī. or, Ṭūsy's list of Shy'ah Books, Fasc. 1--4 @ 1/- each ...		4	0
Gulriz ...		2	0
Hadiqatu'L, Haqiqat, (Text & Eng.) ...		3	8
History of Gujarat ...		1	0
Haft Asmān, History of the Persian Masnawi, Fasc. 1 @ /12/ each ...		0	12
Hisātory of the Caliphs, (English) Fasc. 1--6 @ 1/4/ each ...		7	8
Iqālnamah-i-Jahāngīrī, Fasc. 1--3 @ /10/ each ...		1	14
Iṣābah, with Supplement, 51 Fasc. @ 1/- each ...		51	0
Ma'āṣir-i-Rahīmī, Part I, Fasc. 1--8 @ 2/ each ...		6	0
Maa'āṣir-ul-Umarā, Vol. I, Fasc. 1--9, Vol. II, Fasc. 1--9 ; Vol. III, 1-10 ; Index to Vol. I, Fasc. 10-11 ; Index to Vol. II, Fasc. 10-12 ; Index to Vol. III, Fasc. 11-12 @ /1/ each ...		35	0
Ditto (Eng) Vol. I, Fasc. 1--2, @ 1/4/ each ...		2	8
Memoirs of Tahmasp ...		1	0
Marhamu 'L-Ilali 'L-Mu'Dila Fasc. 1--2 ...		2	0
Muntakhabu-t-Tawārīkh, Fasc. 1--15 @ /10/ each ...		9	6
Ditto (English) Vol. I, Fasc. 1--7 ; Vol. II, Fasc. 1--5 and 3 Indexes ; Vol. III, Fasc. 1 @ 1/ each ...		16	0
Muntakhabu-l-Lubāb, Fasc. 1-19 @ /10/ each ...		11	14
Ditto Part 3, Fasc. 1-2 @ 1/- each ...		1	0
Nukhbatu-l-Fikr, Fasc. 1 @ /10/ ...		0	10
Niẓāmī's Khiradnāmah-i-Iskandari, Fasc. 1--2 @ /12/ each ...		1	8
Persian and Turki Divans of Bayran Khan, Khan Khanan ...		1	0
Qawaninu 's-Sayyad of Khuda Yar Khan 'Abbasi, edited in the original Persian with English notes by Lieut. Col. D. C. Phillott ...		5	0
Riyāzu-s-Salātin, Fasc. 1--5 @ /10/ each ...		3	2
Ditto (English) Fasc. 1--5 @ 1/ ...		5	0
Shah Alam Nama ...		1	14
Tadhkira-i-khushnavīsān ...		1	0
Tubaquāt-i-Nāṣirī, (English), Fasc. 1-14 @ 1/- each ...		14	0
Ditto Index ...		1	0
Tārīkh-i-Fīrūz Shāhi of Ziyāu-d-dīn Barni Fasc. 1--7 @ /10/ each ...		4	6
Tārīkh-i-Fīrūzshāhi, of Shams-i-Sirāj Aif. Fasc. 1--6 @ /10/ each ...		3	12
Ten Ancient Arabic Poems, Fasc. 1--2 @ 1/8/ each ...		3	0
The Mabani 'L Lughat : A Grammar of the Turki Language in Persian		1	8
Tuzuk-i-Jahāngīrī, (Eng) Fasc. 1 @ 1/ ...		1	0
Wis-o-Rāmin, Fasc. 1--5 @ /10/ each ...		3	2
Zafarnāmah, Vol. I, Fasc. 1--9, Vol. II, Fasc 1--8 @ /10/ each ...		10	10

ASIATIC SOCIETY'S PUBLICATIONS.

1. Asiatic Researches. Vols. XX @ 10/ each ... 20 0
2. Proceedings of the Asiatic Society from 1875 to 1899 (1900 to 1904 are out of stock) @ /8/ per No.
3. Journal of the Assiatic Society for 1875 (8), 1871 (7), 1872 (8), 1873 (8), 1874 (8), 1875 (7), 1876 (7), 1877 (8), 1878 (8), 1879 (7), 1880 (8), 1881 (7), 1882 (6), 1883 (5), 1884 (6), 1885 (6), 1886 (8), 1887 (7), 1888 (7), 1889 (10, 1890 (11), 1891 (7), 1892 (8), 1893 (11), 1894 (8), 1895 (7), 1896 (8), 1897 (8), 1898 (8), 1899 (8), 1900 (7), 1901 (7), 1902 (9), 1903 (8), 1904 (16), @ 1/8 per No. to Members and @ 2/ per No. to Non-Members

   N. B.—The figures enclosed in brakets give the number of Nos. in each Volume.
4. Journal and Proceedings, N. S., 1905, to date, (Nos. 1-4 of 1905 are out of stock), @ 1-8 per No. to Members and Rs. 2 per No. to Non-Members.
5. Memoirs, 1905, to date. Price varies from number to number. Discount of 25% to Members.
6. Centenary Review of the Researches of the Society from 1784-1883 ... 3 0
7. Catalogue of the Library of the Asiatic Society, Bengal, 1910, ... 8 0
8. Moore and Hewitson's Descriptions of New Indian Lepidoptera, Parts I--III, with 8 coloured Plates, 4to. @ 6/ each ... 18 0
9. Kaçmiraçabdāmṛta, Parts I & II @ 1/8/ ... 3 0
10. Persian Translation of Haji Baba of Ispahan, by Haji Shaikh Ahmad i-Kirmasi, and edited with notes by Major D. C. Phillott. ... 10 0

Notices of Sanskrit Manuscripts, Fasc. 1-34 @ 1/ each ... 34 0

Nepalese Buddhist Sanskrit Literature, by Dr. R. L. Mitra ... 5 0

N.B.—All Cheques, Money Orders, &c. must be made payable to the "Treasurer Asiatic Society," only.

Books are supplied by V. P. P 16-6-12.